श्री

# सुबोध–संस्कृतम्

OR

# EASY STEPS

## TO SANSKRIT

(Part I)

BY

B. B. KAMAT, B. A., B. Sc. (Bombay)

(BOMBAY EDUCATIONAL DEPARTMENT)

(All rights are reserved by the author including that of translation into Indian & European languages)

Printed by Shantaram T. Ajgaonkar, at Manoranjan Press,
3, Sandhurst Road, Girgaon, Bombay and published
by B. B. Kamat, at 448, Robson Road, Karachi.

DEDICATED

To

**Shrimant Bhavânrao Shriniwâsrâo**

***Alias***

**Balasaheb Pandit Pant Pratinidhi,** B. A.,

**Chief of Aundh**

ऋते ज्ञानान्न मुक्तिः
पुस्तक सं.

Whose "Picture Râmâyana" inspired the author to write this book

# PREFACE

This little book aims at making the study of Sanskrit easier than what it has been hitherto.

The method used here is based upon a few common-place facts about the ability and liking of children:—

(1) They can read and understand sentences as easily as disconnected words.

(2) They are more easily induced to read a connected narrative than to learn a list of disconnected words or sentences,—especially is this the case when the story relates to scenes or persons familiar to them.

(3) All children like pictures—especially good pictures.

(4) They naturally understand things better when explained through their mother-tongue.

(5) It is with the observation and use of expressions, repeated over and over again—and not with a formal study of grammar—that they begin to learn their mother-tongue.

In the following pages, I have tried to apply these simple facts of common experience to the teaching of Sanskrit.

To this end, I could not find a better back-ground than the Story of Râma; nor better pictures than those from the "Picture Râmâyan," kindly permitted to be inserted here-in by the distinguished Artist-Author, the Chief of Aundh.

For a long time I have cherished the idea of writing a book on the present lines; but a little incident during my residence at Oxford induced me to give a shape to it: One of my friends there was frightened away from learning French in the usual way. Being, however, persuaded to adopt a method similar to the one followed in this book, not only could he overcome his fear of French, but he could even enjoy the study of it: This confirmed my belief that a feeling of joy & zest at the outset should go a long way to encourage a beginner to like his lessons in the study of a new language. Hence this humble attempt.

The main business of this book is the reading of the story and the first reading need not be disturbed with any *formal* teaching of grammar. It will be found that, as a result of

several factors introduced, the pupil gets smoothly along with the flow of the narrative and unconsciously picks up some grammar on the way: Before he finishes this, the first part, he will be conversant, in an elementary way, with the Present, the Imperfect and the Second Future Tenses and the Imperative mood of verbs; as also with some prominent types of nouns, pronouns, adjectives and compounds. The Rûpâvali at the end may be used in the subsequent readings and, when a more detailed treatment is required later on, it may be supplemented by the teacher from that standard book—the First Book of Dr. Bhandarkar.

In an introductory primer like this, the Present Tense is used in some lessons, although a past tense would have been more appropriate.

Sandhis between words are deliberately omitted. The beginner is thus left to face only one difficulty, the easier and more fundamental one of the two, viz., (1) to understand the meaning of Padâs; and (2) to disentangle the Padâs from the Sandhis. Most beginners are puzzled with पुस्तकमस्ति although several can easily interpret पुस्तकम् अस्ति. Ample material will, however, be found in the Rûpâvali for the study of Sandhis.

English and Hindi equivalents are given in addition to those in the vernacular. All vernaculars are printed in Devnâgarî characters for the convenience of printing.

Before closing, I must add that, while I am entirely responsible for the defects and inaccuracies that may be found in the book, I owe a debt of gratitude to my colleagues at the N. J. High School, for help in several ways, particularly to Mr. D. S. Patkar, for three of the pictures-as also to several other friends elsewhere, who do not permit me to mention them individually. I cannot, however, omit to mention the kindness of Professors P. V. Kane, G. S. Ghurye, and P. V. Kulkarni, for going through a portion of the Ms and making valuable suggestions. My thanks are also due to Mr. Bherumal Mahirchand of the D. J. Sind college for suggesting several appropriate Sindhi equivalents.

448, Robson Road,
Karachi, Sind, 16th July 1925, } BAPUJI B. KAMAT,

श्रीगणेशाय नमः ।



# प्रथमः पाठः ।

बालकः गणेशम् नमति । बालकस्य नाम अशोकः । तस्य हस्ते पुस्तकम् अस्ति । पुस्तकस्य नाम सुबोध–संस्कृतम् । अशोकः शालाम् गच्छति, गुरुम् नमति, पुस्तकम् पठति च । तेन गुरुः सन्तुष्टः भवति । गुरवे नमः ।

| | | |
|---|---|---|
| प्रथमः पाठः-First Lesson | पहिला पाठ | सबकु पहॾ्यों |
| बालकः-Boy | बालक | बालकु |
| नमति-Bows | प्रणाम करता है | नमे थो |
| बालकस्य-(of) the boy | बालकके | बालकजो |
| नाम-Name | नाम | नालो |
| तस्य-His | उसके | तँहँजो |
| हस्ते-(in) the hand | हाथमें | हत्थमें |
| पुस्तकम्-Book | पुस्तक | किताबु |
| अस्ति-Is | है | आहे |
| शालाम्-(to) school | पाठशालामें | पाठशालामें |
| गच्छति-Goes | जाता है | वञेथो |
| गुरुः-Teacher | गुरु | गुरु |
| गुरुम्-(to) the teacher | गुरुको | गुरूखे |
| पठति-Reads | पढ़ता है | पढ़े थो |
| च-And | और | अँइँ |
| तेन-Therefore | इस लिये | तँहँजे करे |
| सन्तुष्टः-Pleased | प्रसन्न | खुश, परसन |
| भवति-Becomes | होता है | थिये थो |
| नमः-Bow ! | नमस्कार | नमस्कारु |
| गुरवे-(to) teacher | गुरुको | गुरूखे |

# द्वितीयः पाठः ।

## श्रीरामाय नमः ।

कः एषः बालकः ? एषः बालकः रामः । रामः कस्य पुत्रः अस्ति ? रामः दशरथस्य पुत्रः । कः एषः दशरथः ? दशरथः अयोध्यायाः राजा अस्ति। दशरथः रामस्य पिता । रामः दशरथम् नमति ।

रामस्य माता का ? रामस्य माता कौसल्या। तस्मात् कौसल्या दशरथस्य भार्या। रामः कौसल्याम् नमति। रामः मातरम् नमति। रामः पितरम् नमति। सः मातापितरौ नमति । मातापितृभ्याम् नमः ।

| | | |
|---|---|---|
| द्वितीयः पाठः-2nd Lesson | दूसरा पाठ | सबकु बियो |
| कः ?-Who ? | कौन ? | केरु ? |
| कस्य ?-whose ? | किसका ? | कँहिँजो ? |
| एषः-This | यह | हीउ |
| अयोध्यायाः-of Ayodhya | अयोध्याका | अयोध्याजो |
| राजा-King | राजा | राजा |
| पिता-Father | बाप | पीउ |
| माता-Mother | माँ | माउ |
| का ?-Who ? | कौन ? | केरु ? |
| तस्मात्-Therefore | इस लिए | तँहँजे करे |
| भार्या-Wife | जोरू | जाल, स्त्री |
| मातरम्-to the Mother | माँको | माउ खे |
| पितरम्-to the Father | बापको | पीउ खे |
| सः-he | वह | हू |
| मातापितरौ-Parents | माँबाप | माउपीउ |
| मातापितृभ्याम्-to the Parents | माँबापको | माउपीउखे |
| पुत्रः-Son | बेटा | पुटु |



चित्रकारः—श्रीयुत पाटकर.

## तृतीयः पाठः ।

### श्रीलक्ष्मणाय नमः ।

लक्ष्मणः दशरथस्य अन्यः पुत्रः अस्ति । लक्ष्मणस्य माता सुमित्रा । सुमित्रा च दशरथस्य अन्या भार्या ।

रामः दशरथस्य पुत्रः । लक्ष्मणः अपि दशरथस्य पुत्रः । तस्मात् रामः लक्ष्मणस्य भ्राता । रामः लक्ष्मणस्य प्रियः । लक्ष्मणः अपि रामस्य प्रियः । रामलक्ष्मणाभ्याम् नमः ।

| | | |
|---|---|---|
| तृतीयः पाठः-3 rd Lesson | तीसरा पाठ | सबकु टियों |
| अपि-Also | भी | ब, पिण |
| अन्यः-Another | दूसरा | बेओ |
| अन्या-Another | दूसरी | बी |
| प्रियः-Dear | प्यारा | प्यारो |
| भ्राता-Brother | भाई | भाउ |

## चतुर्थः पाठः ।

### पित्रे नमः ।

रामः लक्ष्मणस्य भ्राता अस्ति । रामः लक्ष्मणस्य कीदृशः भ्राता अस्ति ? न सः लक्ष्मणस्य सहोदरः भ्राता । कथम् एतत् ? रामस्य माता कौसल्या । परन्तु लक्ष्मणस्य माता सुमित्रा । तस्मात् रामः लक्ष्मणस्य सापत्नः भ्राता अस्ति, न तु सहोदरः । तथापि रामः लक्ष्मणस्य प्रियः । लक्ष्मणः च रामस्य

प्रियः। रामलक्ष्मणौ द्वौ अपि नृपस्य दशरथस्य प्रियौ, अतीव प्रियौ। नृपाय दशरथाय नमः।

| | | |
|---|---|---|
| चतुर्थः पाठः-4th Lesson | चौथा पाठ | सबकु चोथों |
| पित्रे-(to) father | बापको | पीउखे |
| कीदृशः?-of What kind? | किस प्रकारका ? | कहिड़ो ? |
| सहोदरः- Born of the same mother | सगा | सगो |
| कथम् एतत्?-How is this? | यह कैसा है ? | सो कींय ? |
| परन्तु-But | परंतु | पर |
| तु-But | किंतु | पर |
| किन्तु-But | परंतु, किंतु | पर |
| सापत्नः-Half-brother | सौतेला | माटे जो, लगो |
| तथापि-Never-the-less | तौ भी | तब |
| द्वौ अपि-Both | दोनों भी | बइ ब |
| नृपस्य-( of ) the King | राजाका | राजाजो |
| नृपाय-( to ) the King | राजाको | राजाखे |
| अतीव-Exceedingly | बहुत | घणोइ, अती |

## पञ्चमः पाठः।

### नृपाय नमः।

राजा दशरथः अयोध्यायाम् राज्यम् करोति, प्रजाः रक्षति च। तस्य एका भार्या कौसल्या, अन्या च सुमित्रा नाम। दशरथस्य तृतीया अपि भार्या अस्ति। तस्याः नाम कैकेयी। तस्याः अपि पुत्रः अस्ति भरतः नाम। सुमित्रायाः द्वितीयः अपि पुत्रः अस्ति शत्रुघ्नः नाम। भरतः रामस्य सापत्नः भ्राता।

तथा च शत्रुघ्नः अपि । किन्तु शत्रुघ्नः लक्ष्मणस्य सहोदरः । भ्रातृभ्यः नमः ।

| | | |
|---|---|---|
| पञ्चमः पाठः 5th Lesson | पाँचवाँ पाठ | सबकु पंजों |
| राजा-King | राजा | राजा |
| अयोध्यायाम्-in Ayodhya | अयोध्यामें | अयोध्यामें |
| राज्यम् करोति-Reigns | राज्य करता है | राजु करेथो |
| प्रजाः-Subjects - | प्रजा | परजा |
| रक्षति-Protects | रक्षा करता है | रिख्या करेथो |
| एका-One | एक | हिकड़ी |
| तृतीया-Third | तीसरी | टीं |
| तस्याः-her | उसका | हुनजो |
| द्वितीयः-Second | दूसरा | बेओं |
| तथाच-in the same way | उसी रीती से | तिअँ |

## षष्ठः पाठः ।

रामः लक्ष्मणः भरतः शत्रुघ्नः च चत्वारः भ्रातरः सन्ति । सर्वे अपि शूराः गुणवन्तः च भवन्ति । तेषाम् रामः सर्वस्य प्रियः । विशेषतः तु रामः लक्ष्मणस्य प्रियः, बाल्यात् प्रभृति अतीव प्रियः । सः अपि लक्ष्मणेन विना अन्नम् न भक्षयति, निद्राम् अपि न लभते । यदा रामः अश्वम् आरोहति, मृगयाम् च गच्छति, तदा लक्ष्मणः अपि चापम् गृहीत्वा तम् अनुगच्छति । भरतः शत्रुघ्नस्य प्रियः । शत्रुघ्नः अपि भरतस्य बाल्यात् प्रभृति अतीव प्रियः अस्ति ।

# तैः चतुर्भिः पुत्रैः राजा दशरथः प्रसन्नः अस्ति ।

| | | |
|---|---|---|
| षष्ठः पाठः–6th Lesson | छटवाँ पाठ | सबकु छहों |
| चत्वारः–Four | चार | चार |
| सन्ति–are | हैं | आहिनु |
| सर्वे–All | सब | सभु |
| शूराः-Brave | शूर | सूरमा |
| गुणवन्तः Good | गुणी | वडे गुणवारा |
| तेषाम्–of them | उनमें से | तिन्हमाँ |
| सर्वस्य–of all | सबका | सभनीजो |
| विशेषतः–Particularly | विशेष करके | खास करे |
| बाल्यात् प्रभृति–From childhood | बचपनासे | बालपिणखाँ |
| विना–Without | सिवाय | बिना |
| भक्षयति–Eats | खाता है | खायेथो |
| निद्राम् लभते–Gets sleep | सोता है | निंड करेथो |
| अश्वम् आरोहति–Gets up on a horse | घोडेपर चढ़ता है | घोडेते चढ़ेथो |
| मृगयाम् गच्छति–Goes to hunt | शिकारके लिये जाता है | शिकारते वञेथो |
| चापम् गृहीत्वा–Taking the bow | कमान लेकर | कमान खणी |
| तम् अनुगच्छति–Follows him | उसके पीछे जाता है | पुठयाँ वञेसु थो |
| चतुर्भिः–With the four | चारों से | चइनींसाँ |
| प्रसन्नः–Pleased | प्रसन्न | परसन |
| यदा-तदा–When–then | जब-तब | जडुहीं—तडुहीं |

## सप्तमः पाठः ।



चित्रकारः श्रीयुत पाटकर.

एकदा विश्वामित्रः अयोध्याम् अगच्छत्, दशरथस्य किङ्करम् च अवदत्—"अहं अस्मि मुनिः विश्वामित्रः नाम । वने वसामि । अद्य वनात् आगतः अस्मि । राजानम् दशरथम् च द्रष्टुम् इच्छामि"—इति । किङ्करः राजानम् अगच्छत् अवदत् च—"देव, विश्वामित्रः नाम कश्चित् वनवासी मुनिः द्वारे तिष्ठति। देवम् च द्रष्टुम् इच्छति । श्रुत्वा देवः प्रमाणम्"—इति । किङ्करस्य वचनेन नृपः सन्तुष्टः अभवत् । सिंहासनात् च उत्थाय विश्वामित्रम् अर्घ्येण अपूजयत् । तेन विश्वामित्रः प्रसन्नः अभवत् ।

| | | |
|---|---|---|
| सप्तमः पाठः-7th Lesson | सातवाँ पाठ | सबकु सतों |
| एकदा-Once | एक समय में | हिकड़े मेरे |
| अगच्छत्-Went | गया | वियो |
| किंकरम्-(to)the servant | नौकरको | नोकरखे |
| अवदत्-Said | बोला | चयाईं |
| अहम् अस्मि-I am | मैं हूँ | आँउ आह्याँ |
| अहम् वसामि-I live | मैं रहता हूँ | आँउ रहाँ थो |
| वने-( in ) the forest | बन में | बनमें |
| वनात्(from)the forest | बन से | वनखाँ |
| अद्य-Today | आज | अज्जु |
| आगतः अस्मि-( I ) am Come | आया हूँ | आयो आह्याँ |
| द्रष्टुम् इच्छामि-(I) Wish to see | दर्शनकी इच्छा करता हूँ | दर्शनजी इच्छा अथमु |
| कश्चित्-Some one | कोई | को |
| वनवासी-Resident of a forest | बन में रहनेवाला | बनवासी |
| मुनिः-Sage | मुनि | रिशी |
| द्वारे-( at ) the door | द्वार पर | दरते |
| तिष्ठति-Stands | खड़ा हुआ है | बीठो आहे |
| देव-Your Majesty | हे महाराज | महाराज |
| श्रुत्वा-Having heard | सुन कर | बुधी |
| देवः प्रमाणम्-Your majeysty is the authorit | जैसी महाराजकी आज्ञा | हाणे जे का साँईंजिन् जी आग्या |
| उत्थाय-Getting up | उठ कर | उथी |
| अर्घ्येण With materials of worship | पूजाकी सामग्री सहित | अर्गसाँ |
| अपूजयत्-Worshipped | पूजा किया | पूजा कई |

## अष्टमः पाठः ।

नृपस्य आदरेण विश्वामित्रः प्रसन्नः अभवत् । तम् च कुशलम् अपृच्छत् । नृपः अवदत्–"महामुने, आगमनस्य किम् कारणम् ? तव कामम् कर्तुम् इच्छामि" इति । मुनिः अवदत्–" भोः राजन्, तव वचनेन प्रसन्नः अस्मि । अयम् मम कामः । यत्र अहम् वने वसामि, तत्र द्वौ राक्षसौ अपि वसतः । एकः मारीचः नाम, अन्यः च सुबाहुः । द्वौ अपि मम यज्ञस्य विघ्नकरौ भवतः । तौ रुधिरेण मम वेदीम् सिञ्चतः । तेन मम व्रतभङ्गः च भवति" इति । राजा अपृच्छत्–" यदि एवम्, भवान् तौ किम् न दण्डयति ?" इति ।

| | | | |
|---|---|---|---|
| अष्टमः पाठः | 8th Lesson | आठवाँ | सबकु अठों |
| आदरेण | With respect | आदरसे | आदर भावसाँ |
| कुशलम् | Health | कुशल | चङ भलाई |
| अपृच्छत् | Asked | पूछा | पुच्छी |
| महामुने | O great sage | हे महर्षीजी | हे महामुनि |
| आगमनस्य | of (Your) arrival | आगमनका | अचणँजो |
| कारणम् | Cause | [redacted] | कारण |
| किम् | What ? | क्या ? | केहड़ो ? |
| तव कामः | Your desire | आपकी कामना | तुहिँजी कामना |
| मम कामः | My desire | मेरी कामना | मुहिँजी कामना |
| अयम् | This | यह | हीउ |

| | | |
|---|---|---|
| यत्र–Where | जहाँ | जित्ते |
| तत्र–There | वहाँ | तित्ते |
| राक्षसौ–( two ) demons | राक्षस | राकासु |
| यज्ञस्य–(of)the-sacrifice | यज्ञका | यग्यजो |
| विघ्नकरौ–Creators of difficulty | विघ्न करनेवाले | विघनु विझंदर |
| रुधिरेण–( with ) blood | रक्त से | रत्तसाँ |
| वेदीम् ( to ) the altar | वेदीको | वेडी |
| सिंचतः Sprinkle | छिड़कते है | छिण्कारिंथा |
| व्रत-भंगः Breaking of the vow | व्रतका भंग | विर्तजो भंगु |
| भवान् दण्डयति–Your Honour punishes | आप दंड देते हैं | अव्ही सजा कयों था |

---

## नवमः पाठः ।

मुनिः प्रत्यभाषत–"अहम् तौ स्वयम् न दण्डयामि यतः मम व्रतम् क्रोधेन नश्यति । तस्मात् रामम् मे प्रयच्छ । सः विघ्नकरान् राक्षसान् दण्डयिष्यति । तेन ख्यातः भविष्यति च । अद्य एव रामेण सह वनम् गमिष्यामि " इति ।

रामः दशरथस्य ज्येष्ठः पुत्रः । तस्मात् विश्वामित्रस्य तत् वचनम् श्रुत्वा दशरथः दुःखितः अभवत् । ऋषिम् अवदत् च–"रामः अद्यापि बालकः एव । एकाकी राक्षसैः सह युद्धम् कर्तुम् न शक्तः । सैन्यम् गृहीत्वा अहम् अपि रामेण सह वनम् गमिष्यामि । राक्षसैः सह युद्धम् च करिष्यामि । तस्मात् सर्वम् मे कथय । के ते राक्षसाः ? कीदृशम् तेषाम् बलम् ?

के तान् रक्षन्ति ? ” इति ।

| | | |
|---|---|---|
| नवमः पाठः-9th Lesson | नौवाँ पाठ | सबकु नाओ |
| प्रत्यभाषत-Replied | जबाब दिया | जवाबु डिन्नो |
| क्रोधेन- (with) anger | क्रोध से | क्रोधजे करे |
| नश्यति-Disappears | नाश होता है | नासु थियेथो |
| प्रयच्छ-Give | दीजिये | डे |
| दण्डयिष्यति-(He) will punish | दंड देगा | सजा डींदो |
| ख्यातः भविष्यति-(He)will be famous | विख्यात हो जायगा | मशहूर थींदो |
| रामेण सह-With Rama | रामके साथ | रामसाँण |
| गमिष्यामि-(I) will go | जाऊँगा | वेइंदुसु |
| ज्येष्ठः-The eldest | जेठा | सभनीखाँ वड्डो |
| वचनम्-Speech | भाषण | वचनु |
| दुःखितः-Grieved | दुःखी | दुकखी |
| बालकः एव-A mere boy | केवल बालक | रुगो बालकु |
| एकाकी-Single-handed | अकेला | अकेलो |
| शक्तः-Able | शक्तिमान | समर्थ |
| युद्धम् कर्तुम्-To fight | लड़नेके लिये | जुद्ध करणजे लाय |
| युद्धम् करिष्यामि-(I) will fight | लड़ूँगा | जुद्ध कंदुसु |
| मे कथय-Tell me | मुझको कहिये | मुखे बुधाय |
| के ?-Who ? | कौन ? | केरु ? |
| बलम्-Strength | शक्ति | बल्लु |
| अद्यापि-As yet | अब तक | अञा |

## दशमः पाठः ।

दशरथस्य तत् वचनम् श्रुत्वा विश्वामित्रः अभाषत-“अस्ति दक्षिणस्याम् दिशायाम् लङ्का नाम नगरी । तत्र रावणः नाम राक्षसः वसति । अन्ये राक्षसाः

रावणस्य सहायाः । रावणाय विधिना वरः दत्तः । तेन मत्तः सः सज्जनान् पीडयति । यज्ञस्य विघ्नकरः भवति च । यदा रावणः स्वयम् यज्ञस्य विघ्नकरः न भवति, तदा सः मारीचम् सुबाहुम् च प्रवर्तयति । तस्मात् तौ मम यज्ञस्य विघ्नकरौ भवतः । अन्ये अपि राक्षसाः मम यज्ञस्य विघ्नकराः भवन्ति" इति ।

| | | |
|---|---|---|
| दशमः पाठः-10th Lesson | दसवाँ पाठ | सबकु डहों |
| अभाषत-Said | बोला | चयो |
| दक्षिणस्याम् दिशायाम्-In the South direction | दक्षिण दिशामें | डख्खणु डिस्साडे |
| नगरी-City | नगर | नगरी |
| सहायाः-Helpers | सहायक | सहायता कंदर |
| विधिना-By the creator | ब्रह्मासे | ब्रह्माखाँ |
| वरः-Boon | वर | वर |
| दत्तः-Given | दिया गयाथा | डिन्नल |
| मत्तः-In-solent | प्रमादी | मस्त |
| सज्जनान्-( to ) good people | सत्पुरुषोंको | चङनु माण्हुनुखे |
| पीडयति-Troubles | पीडा देता है | पीड़ेथो |
| प्रवर्तयति-Instigates | प्रवृत्त करता है | छेरेथो |

## एकादशः पाठः ।

राजा वदति-" महर्षे, मम चत्वारः पुत्राः रामलक्ष्मणभरतशत्रुघ्नाः । चतुर्णाम् पुत्राणाम् रामः ज्येष्ठः । सर्वेषाम् रामः मम अतीव प्रियः । रामः अद्यापि बालकः एव । कथम् सः एकाकी राक्षसैः सह युद्धम् करिष्यति ? बालम् रामम् ते न दास्यामि" इति ।

शीघ्र-कोपः विश्वामित्रः दशरथाय क्रुध्यति। तस्य नेत्रे आरक्ते भवतः। सः राजानम् वदति- "राजन् दशरथ, पूर्वम् त्वम् अवदः-'तव कामम् कर्तुम् इच्छामि' इति। इदानीम् च वदसि-'न तव कामम् करिष्यामि' इति। एतत् तव न उचितम्। अहम् यथागतम् गमिष्यामि। तव प्रतिज्ञा मिथ्या। मिथ्या-प्रतिज्ञः त्वम् कथम् सुखी भविष्यसि?" इति उक्त्वा सः क्रुद्धः मुनिः गन्तुम् इच्छति।

| | | |
|---|---|---|
| एकादशः पाठः-11th Lesson | ग्याहरवाँ पाठ | सबकु याऱ्हों |
| वदति-Says | बोलता है | चवेथो |
| चतुर्णाम्-(of) the four | चाऱ्होंमें से | चइन्मां |
| दास्यामि-(I) Shall give | दूँगा | डींदुसु |
| शीघ्र-कोपः-Quick-tempered | गुस्सैल | सिग्घो कोपकंदर |
| क्रुध्यति-(he) is angry | गुस्सा होता है | कावड्जेथो |
| नेत्रे-Eyes | नेत्र | अक्ख्युँ |
| आरक्ते-Red | लाल | गाढ्युं |
| पूर्वम्-Formerly | पहिले | अग्गे |
| त्वम् अवदः-You said | तुम बोले | तो चयो हो |
| इदानीम्-Now | अब | हाणे |
| न उचितम्-Not proper | अनुचित | लायकु न आहे |
| यथागतम्-Just the way (I) came | जैसा आया था वैसेही | जीय आयुसु तीय |
| प्रतिज्ञा-Promise, word | प्रतिज्ञा | प्रतिग्या |
| मिथ्या-False | झूठा | खोटी |
| मिथ्या-प्रतिज्ञः-Liar | असत्यवचनवाला | खोटी प्रतिग्यावारो |
| सुखी-Happy | सुखी | सुखी |
| इति उक्त्वा-So Saying | ऐसा बोल कर | एतरो चयी |

## द्वादशः पाठः ।

अस्ति दशरथस्य कुलगुरुः वसिष्ठः नाम । क्रुद्धम् विश्वामित्रम् दृष्ट्वा, सः राजानम् वदति–"राजन् दशरथ, न एतत् तव उचितम् । तव प्रतिज्ञा मिथ्या मा भवतु । सत्य–प्रतिज्ञः भव । त्वम् क्षत्रियः असि । स्वधर्मम् मा त्यज । यज्ञस्य रक्षणम् कुरु । मुनये विश्वामित्राय रामम् प्रयच्छ । विश्वामित्रेण रक्षितम् रामम् पीडयितुम् राक्षसाः न समर्थाः । एषः मुनिः विविधानि अस्त्राणि जानाति । सर्वम् अपि रामस्य हिताय भविष्यति । तस्य भयम् न विद्यते । संशयम् त्यज । प्रतिज्ञा–भङ्गम् मा कुरु" इति ।

| | | |
|---|---|---|
| द्वादशः पाठः-12th lesson | बाहरवाँ पाठ | सबकु बारहों |
| कुलगुरुः-Family-preceptor | कुलगुरु | कुलगुरु |
| सत्य-प्रतिज्ञः-One of true word | वचनका सच्चा | सची प्रतिग्यावारो |
| क्षत्रियः-One of the warrior class | क्षत्रिय | खत्री |
| स्वधर्मः-Own duty | स्वधर्म | पहिंजो धर्मु |
| मा त्यज-Do not abandon | मत छोड़ो | न छडु |
| रक्षणं कुरु-Protect | रक्षा करो | रिख्या करु |
| रक्षितः-Protected | रक्षा किया हुआ | रिख्या कयल |
| समर्थाः-Able | समर्थ | समर्थ |
| विविधानि-Various | नाना प्रकारका | घणे किसमजा |

| | | |
|---|---|---|
| अस्त्राणि- Celestial weapons | अस्त्र | अस्तर |
| जानाति-Knows | जानता है | जाणे थो |
| हिताय-For the good | भलाई वास्ते | भले लाय् |
| संशयम् त्यज-Abandon doubt | शंका मत करो | सनसो छडु |
| प्रतिज्ञा-भंगः-Breach of promise | प्रतिज्ञा भंग | प्रतिग्याजो भञणु |
| भयम्-Fear | भय, डर | भव |
| विद्यते-Exists | होता है | आहे |

---

## त्रयोदशः पाठः ।

वसिष्ठस्य तत् वचनम् श्रुत्वा, नृपः विश्वामित्रम् वदति–" भगवन्, माम् क्षमस्व । रामम् ते दास्यामि" इति । अनेन दशरथस्य वचनेन वसिष्ठ–विश्वामित्रौ प्रसन्नौ भवतः । राजा दशरथः रामम् आह्वयति । रामः शीघ्रम् आगच्छति । रामेण सह लक्ष्मणः अपि आगच्छति । अग्रतः रामः आगतः, तस्य पृष्ठतः च लक्ष्मणः । नृपः प्रियम् पुत्रम् रामम्, तथा एव लक्ष्मणम् च, विश्वामित्राय प्रयच्छति [1] । तेन विश्वामित्रः सन्तुष्टः भवति । रामलक्ष्मणौ विश्वामित्रम् नमतः । सः अपि हस्तौ उद्यम्य, ताभ्याम् आशीर्वचनम् यच्छति, यथा चित्रे दृश्यते ।

---

१ दाता = [illegible]

| | | |
|---|---|---|
| त्रयोदशःपाठः-13th lesson | तेरहवाँ पाठ | सबकु तेन्हों |
| माम् क्षमस्व-Forgive me | मुझको क्षमा करो | मूते खिमा करु |
| अनेन-With this | इससे | हिनसाँ |
| आह्वयति-Calls | बुलाता है | कोठेथो |
| शीघ्रम्-Quickly | शीघ्रता से | झट्ट |
| अग्रतः-In front of | आगे | सिग्घो |
| पृष्ठतः-Belind | पीछे | अम्याँ |
| हस्तौ उद्यम्य-Raising hands | हाथ उपर उठाके | हत्थ खणी |
| आशीर्वचनम्-Blessing | आशीर्वाद | आसीस |
| चित्रे-In the picture | चित्रमें | तसवीरमें |

## चतुर्दशः पाठः ।

एषः श्यामलः बालकः रामः । अयम् च गौरः बालकः लक्ष्मणः । रामलक्ष्मणौ विश्वामित्रस्य अग्रतः तिष्ठतः । द्वौ अपि अञ्जलिम् बद्ध्वा विश्वामित्रम् नमतः । रामलक्ष्मणयोः दक्षिणतः गुरुः वसिष्ठः तिष्ठति, तयोः पृष्ठतः च राजा दशरथः । वसिष्ठदशरथयोः पृष्ठतः च सिंहासनम् वर्तते । सिंहासनस्य उपरि छत्रम् च भवति । तस्य वामतः एकः किङ्करः तिष्ठति । तस्य हस्ते चामरम् अस्ति । सिंहासनस्य दक्षिणतः अन्यस्य किङ्करस्य हस्तः एव दृश्यते । तस्मिन् हस्ते अपि अन्यत् चामरम् भवति । छत्रम् च द्वे चामरे च राज-चिह्नानि । विश्वामित्रस्य पार्श्वतः अपि तृतीयः किङ्करः भवति । सर्वे अपि प्रसन्नाः दृश्यन्ते ।



चित्रकारा:—श्रीमंत बाळासाहेब पंत प्रतिनिधि, बी. ए., चीफ् ऑफ् औंध.

| | | |
|---|---|---|
| चतुर्दशः पाठः-14th Lesson | चौदहवाँ पाठ | सबकु चोड्होँ |
| श्यामलः-Dark | साँवलाँ | साँवरो |
| गौरः-Fair | गोरा | गोरो |
| अंजलिम् बद्ध्वा-Folding hands | हाथ जोडकर | हत्थ बधी |
| दक्षिण-तः-By the right | दाहिने बाजूपर | साजे पासे |
| वाम-तः-By the left | बांयें बाजूपर | डाये पासे |
| पार्श्व-तः-By the side | एक तरफ होकर | पासेमेँ |
| सिंहासनम्-Throne | सिंहासन | सिंघासनु |
| वर्तते-Is | होता है | आहे |
| उपरि-Above | उपर | मथाँ |
| छत्रम्-Umbrella | छाता | छट्टी |
| चामरम्-Chamar | चामर | चँवर |
| अन्यत्-Another | दूसरा | बी |
| राजचिह्नानि-Royal insignia | राज-चिह्न | राजाइजुँ निशाण्युँ |
| दृश्यन्ते-Are seen | देखनेमें आते हैँ | डिसजंथा |

---

## पञ्चदशः पाठः ।

रामस्य शीर्षे मुकुटः, कण्ठे हारः, पृष्ठे च तूणीरः। तूणीरे च बाणाः दृश्यन्ते। लक्ष्मणस्य अपि शीर्षे कण्ठे पृष्ठे च मुकुट-हार-तूणीराः दृश्यन्ते। तथा च दशरथस्य अपि। रामलक्ष्मणौ बालकौ एव दृश्येते। दशरथः तु बलवान् दृश्यते। विश्वामित्रस्य मस्तके जटाः वर्तन्ते, तथा च वसिष्ठस्य अपि। तयोः मुखयोः प्रभूताः केशाः वर्तन्ते। वसिष्ठस्य कूर्चः दीर्घः धवलः च। विश्वामित्रस्य अपि कूर्चः दीर्घः अस्ति।

न तु तादृशः धवलः यादृशः वसिष्ठस्य । एकः पृष्ठे अजिनम् धारयति, अन्यः तु क्षौमम् । यः किङ्करः विश्वामित्रस्य पार्श्वे तिष्ठति, तस्य हस्ते दण्डः वर्तते। सः पृष्ठे कार्पासम् वस्त्रम् धारयति । तस्य शिरोवस्त्रम् अपि कार्पासम् अस्ति । तस्य कूर्चः ह्रस्वः कृष्णः च ।

| | | |
|---|---|---|
| पंचदशः पाठः-15th lesson | पंद्रहवाँ पाठ | सवकु पंधरों |
| शीर्षे,मस्तके-On the head | सिर पर | मथेते |
| मुकुटः-Crown | मुकुट | मुकटु |
| कण्ठे-On the neck | गले में | गलेमें |
| हारः-Neck-lace | हार | हार |
| पृष्ठे-On the back | पीठपर | पुठीअते |
| तूणीरः-Arrow-bag | तर्कश | तीरंजी थेली |
| बाणाः-Arrows | बाण | तीर |
| बलवान्-Strong | मजबूत | बलवानु |
| जटाः-Matted hair | जटा | जटाउँ |
| वर्तते-Is | है | आहे |
| तयोः मुखयोः-on their faces | उनके मुँह पर | उनहनूजे मुँहते |
| प्रभूताःकेशाः-Ample hair | बहुत बाल | झज्झा वार |
| कूर्चः-Beard | दाढ़ी | डाऱ्ही |
| दीर्घः-ह्रस्वः-Long-Short | लंबा-छोटा | डिग्घो-नंढो |
| धवलः-कृष्णः-White-black | सफेद-काला | अच्छो-कारो |
| अजिनम्-Deer's skin | अजिन | हरणजी खल्लु |
| क्षौमम्-Silken cloth | रेशमी ( कपडा ) | रेशमजो कपड़ो |
| कार्पासम्-Made of cotton | सूती ( कपडा ) | सोटी |
| तादृशः- Of that sort | उतना | तेहड़ो |
| शिरोवस्त्रम्-Headdress | फेंटा | पग्ग |

## षोडशः पाठः ।

दशरथेन रामः विश्वामित्राय दत्तः । तेन सह विश्वामित्रः वनाय प्रस्थितः । मुनिः अग्रतः याति, तस्य पृष्ठतः च रामः चापम् गृहीत्वा गच्छति । तस्य पृष्ठे तूणीरः वर्तते । रामः वनम् गच्छति । तदा लक्ष्मणः अपि तम् अनुगच्छति । तस्य अपि हस्ते धनुः वर्तते, पृष्ठे च तूणीरः । तूणीरे च बाणाः वर्तन्ते । क्रोशद्वयम् गत्वा ते सरयूम् नदीम् पश्यन्ति । नद्याम् प्रभूतम् जलम् वर्तते । विश्वामित्रः रामम् अभिभाषते–"वत्स राम, इयम् नदी सरयूः नाम । अस्याः नद्याः शोभाम् पश्य" इति ।

| | | |
|---|---|---|
| षोडशःपाठः–16th Lesson | सोलहवाँ पाठ | सबकु सोन्हों |
| दत्तः अस्ति–Is given | दिला गया | डिनलु आहे |
| प्रस्थितः–Started | चला हुआ | रवानो थियलु |
| याति–Goes | जाता है | वञेथो |
| धनुः–Bow | कमान | कमानु, धनुष |
| क्रोश-द्वयम्–Two kosas | दो कोस | ब कोह |
| पश्यन्ति–(they) See | देखते है | डिसंथा |
| वत्स–Child | बच्चा | बच्चा |
| शोभाम् पश्य–See the beauty | शोभा देख | सोभ्या डिस्सु |
| अभिभाषते–Speaks | बोलता है | चवेथो |
| इयम् नदी–This river | यह नदी | इहा नदी |
| अस्याः नद्याः–Of this river | इस नदीका, | हिन्न नदीयजी |
| जलम्–Water | जल | पाणी |

## सप्तदशः पाठः ।

ऋषिः भाषते—" अस्याम् नद्याम् प्रभूतम् जलम् वर्तते। जलम् च स्वच्छम् अस्ति। वत्स राम, जलम् हस्ते गृहाण । अहम् ते अस्त्र—विद्याम् दास्यामि । इमाम् विद्याम् शिक्षस्व। अनया विद्यया त्वम् सर्वान् शत्रून् विजेष्यसे। न च ते क्षुधा पिपासा वा भविष्यति। शीघ्रम् जलम् स्पृश । कालक्षेपम् मा कुरु " इति ।

रामः प्रसन्नः भवति, नद्याः जलम् हस्तेन स्पृशति, ऋषिणा दत्ताम् विद्याम् शिक्षते च । तेन ऋषिः अपि प्रसन्नः भवति । भगवान् सूर्यः पश्चिमस्याम् दिशायाम् अस्तम् गच्छति । अयम् सन्ध्याकालः प्राप्तः । सन्ध्यावन्दनार्थम् ऋषयः स्नानम् कुर्वन्ति । त्रयः अपि विश्वामित्रः रामः लक्ष्मणः च ताम् रात्रिम् नद्याः तीरे नयन्ति ।

| | | |
|---|---|---|
| सप्तदशःपाठः-17th Lesson | सतरहवाँ पाठ | सबकु सतन्हों |
| अस्याम्-In this | इसमें | हिन्नमे |
| स्वच्छम्-Clear | स्वच्छ | अच्छो |
| गृहाण-Take | ले | खणु |
| अस्त्रविद्या-Science of weapons | अस्त्र-विद्या | अस्तरन् जी विद्या |
| शिक्षस्व-Learn | सीख | सिक्ख |
| शत्रुः-Enemy | शत्रु | शत्रु |
| विजेष्यसे-( you ) will conquer | विजयी होगा | -खे जीतिंदे |

| | | |
|---|---|---|
| क्षुधा-Hunger | भूख | बुक्ख |
| पिपासा-Thirst | प्यास | उञ्ञ, पिआसु |
| वा-Or | अथवा, या | याँ |
| स्पृश-Touch | छू | छुहु |
| काल-क्षेपः-Waste of time | देरी | देर |
| शिक्षते-Learns | सीखता है | सिखेथो |
| पश्चिमस्याम् दिशायाम्-In the west | पश्चिम दिशामें | उलहंदे डिस्सते |
| अस्तम् गच्छति-Sets | छिपता है | लहेथो |
| सन्ध्या-कालः-Evening-time | शाम, संध्या | संझा |
| प्राप्तः-Arrived | आया हुआ | अची पहुतल |
| वन्दनार्थम्-In order to salute | वंदन करनेके लिये | प्रार्थना करणजे लाय |
| तीरे-On the bank | किनारे पर | किनारे ते |
| रात्रिम् नयन्ति-Pass the night | रात गुजारते हैं | रात गुजारींथा |

---

## अष्टादशः पाठः ।

"वत्स राम, शयनम् त्यक्त्वा उत्तिष्ठ। प्राप्तः अयम् प्रभातकालः । नक्षत्राणि आकाशे न दृश्यन्ते । अयम् भगवान् सूर्यः पूर्वस्याम् दिशायाम् उदयति । शीघ्रम् उत्थाय भगवन्तम् भास्करम् पश्य, तम् नम, दिनकृत्यानि च आरभस्व। वत्स लक्ष्मण, त्वम् अपि तत् एव कुरु" ।

विश्वामित्रस्य तत् वचनम् श्रुत्वा, रामः शयनात् उत्तिष्ठति, स्नानम् च करोति । तथा च लक्ष्मणः

अपि । तदनन्तरम् प्रभात-करणीयानि कृत्वा, विश्वामित्रम् च नमस्कृत्य, तेन सह वनम् गन्तुम् द्वौ अपि उद्यतौ । वनम् गच्छन्तः ते मार्गे गङ्गायाः सरय्वाः च सङ्गमम् पश्यन्ति ।

| | | |
|---|---|---|
| अष्टादशः पाठः-18 th Lesson | अठारहवाँ पाठ | सबकु अरन्हों |
| शयनम् त्यक्त्वा-Leaving the bed | बिस्तर छोड कर | हंधु छड्डे |
| प्रभात-कालः-dawn | सुबह | प्रभातजो समो |
| नक्षत्राणि-Stars | तारे | तारा |
| आकाशे-In the sky | आकाशमें | आकाशमें |
| पूर्वस्याम् दिशायाम्-In the western direction | पूर्व दिशामें | उभ्रंदे डिस्समे |
| उदयति-Rises | निकलता है | उभ्रे थो |
| भास्करः-The sun | सूरज | सूरजु |
| दिनकृत्यानि-Daily routine | दिनके काम | डीहजा कम्म |
| आरभस्व-Begin | आरंभ करो | शुरू करु |
| स्नानम्-Bath | स्नान | सनाणु |
| तदनन्तरम्-After that | उसके पीछे | तहँखाँ पोइ |
| वनम् गच्छन्तः-those going to the forest | बनको जानेवाले | बनडे विअंदर |
| उद्यतौ-Ready | तैयार | तिआर |
| सङ्गमः-Confluence | संगम | मेलापु |
| मार्गे-On the way | मार्गमे | वाट्टते |
| प्रभातकरणीयानि-Morning duties | सुबहका काम | सुबुहुजा कम्म |

## एकोनविंशः पाठः ।

मुनिः अभाषत—"वत्सौ, पश्यतम् इदम् गङ्गायाः दक्षिणे तीरे ताटकायाः दारुणम् वनम्" इति । रामः अपृच्छत्—" का इयम् ताटका ?" इति । मुनिः प्रत्यभाषत—" इयम् ताटका सुन्दस्य राक्षसस्य भार्या । पुरा एषः जनपदः धन—धान्य—सम्पन्नः आसीत् । अथ गच्छता कालेन, इयम् राक्षसी अत्र आगता । तस्याः पुत्रः मारीचः नाम नित्यम् प्रजाः त्रासयते । सा च तस्य दुष्टा माता ताटका इमम् जनपदम् विनाशयति । सा मार्गम् आवृत्य अत्र वसति । ईदृशम् उत्सादितम् देशम् आगन्तुम् कः अपि न शक्तः । तस्मात् मारय एनाम् दुष्टाम् । इमम् देशम् च पूर्ववत् निष्कण्टकम् कुरु " इति ।

---

| | | |
|---|---|---|
| एकोनविंशः पाठः–19th Lesson | उन्निसवाँ पाठ | सबकु ऊणीहों |
| दारुणम्–Frightful | भयानक | भयानकु |
| जनपदः–Country-side | प्रदेश | देसु |
| सम्पन्नः–Prosperous | आबाद | आबादु |
| धनधान्येन-With wealth | धनधान्य से | माल मिलक्यतजे करे |
| नित्यम्–Always | नित्य | नित्त |
| त्रासयते–Frightens | डराता है | डेजारेथो |
| विनाशयति–Desolates | उजाड़ करती है | बरबादु करेथी |

| | | |
|---|---|---|
| मार्गम् आवृत्य–Obstructing the way | रस्ता रोक कर | रस्तो रोके |
| उत्सादितम्–Desolated | उजाड़े हुए | सुञे |
| शक्तः अस्ति–Is able | समर्थ है | सघेथो |
| दुष्टा–Wicked | दुष्ट | पापी |
| पूर्ववत्–As before | पहिले जैसा | अग्गे वांगे |
| निष्कण्टकम् कुरु–Free it from trouble | निर्भय कर | बेखटके कर |

---

## विंशः पाठः ।

रामः वदति—" भगवन्, इयम् ताटका राक्षसी अपि नारी अस्ति । कथम् नु अहम् नारीम् मारयेयम् ?" इति । मुनिः प्रतिभाषते—" मा मैवम् । एषा नारी अपि दुष्टा परमदारुणा च । त्वाम् ऋते न कश्चित् एनाम् दण्डयितुम् शक्तः । " नारीवधः अयम् " इति शङ्का न कार्या । न वा इयम् दयाम् अर्हति । धर्मः एव क्षत्रियस्य दुष्टानाम् दण्डनम् । ताटका च अतीव दुष्टा । निःशङ्कम् ताम् मारय । पुरा अपि बहुभिः राजपुत्रैः धर्मरहिताः दुष्टाः नार्यः वधिताः इति । रामः वदति—" भगवन्, भवतः वचनम् प्रमाणम् । ताटकाम् वधिष्यामि " इति ।



चित्रकारः—श्रीमंत बाळासाहेब पंत प्रतिनिधि, बी. ए., चीफ् ऑफ् औंध.

| | | |
|---|---|---|
| विंशः पाठः-20th Lesson | बीसवाँ पाठ | सबकु वीहो |
| नारी-Woman | नारी | नारी |
| कथम् नु मारयेयम्?-How should I kill? | मैं कैसे घात करूँ? | कीयँ मार्यां ? |
| मा मैवम्-Oh no!! | नहीं, नहीं! | न, ईय न |
| परमदारुणा-very terrible | परम कठोर | डाढी भयानकु |
| त्वाम् ऋते-Excepting you | बिना तुमारे | तोखाँ सवाय |
| नारी-वधः-Woman-murder | स्त्री-हत्या | इस्त्री हत्या |
| शङ्का-doubt | शंका | शकु |
| दयाम् अर्हति-Deserves pity | दया योग्य है | दया जोगी आहे |
| धर्मः-Duty | धर्म | धर्मु |
| दण्डनम्-to punish | दंड देना | सजा डिअणु |
| निःशङ्कम्-Without hesitation | बेशक | बेशकु |
| धर्म-रहिताः-Void of religion | अधर्मी | अधर्मी |
| प्रमाणम्-Authority | प्रमाण | कबूल |
| ताम् मारय-Kill her | उसका घात करो | हिनखे कुहु |

## एकविंशः पाठः ।

इदम् आलेख्यम् ताटकायाः वनस्य । अस्मिन् बहवः वृक्षाः सन्ति । वृक्षाणाम् स्कन्धेषु शाखाः वर्तन्ते, शाखासु च पर्णानि । वृक्षान् गणयामि । अत्र द्वादश वृक्षाः दृश्यन्ते । दक्षिणतः एकः । वामतः च एकः, द्वौ, त्रयः, चत्वारः, पञ्च, षट्, सप्त, अष्टौ, नव, दश, एकादश वृक्षाः सन्ति । दूरे ताटका

दृश्यते । तस्याः दक्षिणे हस्ते खड्गः, वामे हस्ते च फलकः । वामतः यः प्रथमः वृक्षः भवति, तस्य अधस्तात् मुनिः विश्वामित्रः तिष्ठति । तस्य अधस्तात् द्वौ चापधरौ कुमारौ तिष्ठतः । तौ राजपुत्रौ रामलक्ष्मणौ, श्यामलः रामः, गौरः च लक्ष्मणः । तयोः चापयोः मौर्व्यौ अपि दृश्येते । रामः मौर्व्याम् बाणम् आरोप्य, सन्धानम् च कृत्वा, ताटकाम् मारयति इव । लक्ष्मणः तु केवलम् मौर्व्याम् बाणम् आरोप्य सज्जः तिष्ठति ।

| | | |
|---|---|---|
| एकविंशः पाठः–21st Lesson | एक्कीसवाँ पाठ | सबकु एकीहों |
| आलेख्यम्–A Picture | चित्र | तसवीर |
| बहवः वृक्षाः–Many trees | बहुत पेड़ | घणा वण |
| स्कन्धेषु–On the trunks | पेड़ोंपर | थुड़ ते |
| शाखाः–Branches | शाखा | शाखुँ |
| पर्णानि–Leaves | पत्ते | पन |
| गणयामि–( I ) Count | गिनता हूँ | गणाँथो |
| दूरे–In the distance | दूर | पर्याँ |
| खड्गः–A Sword | तरवार | तरारु |
| फलकः–A Shield | ढाल | ढालु |
| अधस्तात्–Beneath | नीचे | हेठु |
| पुरस्तात्–In front of | आगे | अग्याँ |
| चाप-धरौ–Two with bows | धनुर्धारी | कमानवारा |
| मौर्वी–A Bow-string | कमानकी डोरी | कमानजी नोरी |
| आरोप्य–Having fixed | ( बाण ) चढ़ा कर | खोरे |
| सन्धानम् कृत्वा–Taking aim | निशाना करके | निशानु करे |
| केवलम्–Merely | फकत | फकतु |
| सज्जः–Ready | तैयार | तिआर |

## द्वाविंशः पाठः ।

रामः बाणेन ताटकाम् अमारयत् । मृतायाम् च तस्याम्, इदम् वनम् अधुना निष्कण्टकम् भवति । अद्यप्रभृति जनपदः सुखी भविष्यति, यतः ताटका तम् न विनाशयिष्यति । ताटकायाः वधेन विश्वामित्रः प्रसन्नः भवति । सः रामाय बहूनि अस्त्राणि प्रयच्छति । तानि अस्त्राणि प्रतिगृह्य रामः वदति— "भगवन्, आश्रमम् ते शीघ्रम् गच्छाम । कुत्र ते दुष्टाः राक्षसाः ये तव यज्ञस्य विघ्नकराः भवन्ति ? अहम् तत्र गत्वा यज्ञम् रक्षिष्यामि" इति । ततः ते त्रयः अपि सिद्धाश्रमम् नाम विश्वामित्रस्य आश्रमम् गच्छन्ति । तेन आश्रमवासिनः मुनयः सन्तुष्टाः भवन्ति ।

| | | |
|---|---|---|
| द्वाविंशः पाठः-22nd Lesson | बाईसवाँ पाठ | सबकु बावीहों |
| अधुना-At present | अभी | हाणे |
| मृतायाम् तस्याम्—She, being dead | उसके मृत्यु के पीछे | हुनजे मरणखाँ पोइ |
| बहूनि अस्त्राणि-Many weapons | बहुत अस्त्र | घणाईं अस्त्र |
| तानि अस्त्राणि-Those weapons | वे अस्त्र | उहे अस्त्र |
| प्रतिगृह्य-Having accepted | स्वीकार करके | कबूल करे |

| | | |
|---|---|---|
| गच्छाम-Let us go | हम जावें | हलो तह् हलुँ |
| ततः-Then | तब | तहँखाँ पोइ |
| आश्रम-वासिनः-Residents of the hermitage | आश्रममें रहनेवाले | आश्रममें रहंदर |
| आश्रमः-A Hermitage | आश्रम | आश्रमु |

---

## त्रयोविंशः पाठः ।

आश्रमवासिनः अर्घ्येण विश्वामित्रम् अपूजयन्, राजपुत्राभ्याम् अतिथि-क्रियाम् च अकुर्वन् । राजपुत्रौ विश्वामित्रम् अवदताम्—"अद्य एव भवान् दीक्षाम् गृह्णातु । विघ्नकराः च ते राक्षसाः कदा निवारणीयाः तत् नौ कथयतु" इति । मुनिः प्रत्यभाषत—"अद्य दीक्षाम् गमिष्यामि । अद्यप्रभृति षट् दिनानि युवाम् तपोवनम् रक्षतम् । अहम् तु मौनम् धारयिष्यामि" इति । मुनेः तत् वचनम् श्रुत्वा, रामलक्ष्मणौ अनिद्रौ पञ्च दिनानि तपोवनम् अरक्षताम् । अथ षष्ठे दिने समागते, रामः लक्ष्मणम् अवदत्—"तात लक्ष्मण, समाहितः भव" इति । पुरोहितः वेद्याम् अग्निम् अज्वलयत् । यथान्यायम् च यज्ञः सम्प्रवर्तितः अभवत् । तस्मिन् एव क्षणे कश्चित् भयानकः महान् शब्दः आकाशे प्रादुरासीत् ।



चित्रकार:—श्रीमंत बाळासाहेब पंत प्रतिनिधि, बी. ए., चीफ् ऑफ् औंध.

| | | |
|---|---|---|
| त्रयोविंशः पाठः-23 rd Lesson | तेईसवाँ पाठ | सबकु टेवीहों |
| अतिथिः-A guest | अतिथि | महेमानु |
| अतिथि-क्रिया-Hospitality | अतिथि-सेवा | महेमान नवाज़ी |
| अद्य एव-Even today | आज ही | अज्जु ई |
| ( भवान् ) दीक्षाम् गृह्णातु-Take the vow | दीक्षा लीजिये | विर्तु रखो |
| निवारणीयाः-To be warded off | दूर हटाने योग्य | हटाइणु जोग |
| षट् दिनानि-Six nights | छः दिन | छ डींहँ |
| युवाम् रक्षतम्-Protect | तुम रक्षा करो | तव्हीं रिख्या कजो |
| मौनम्-a Vow of silence | मौन | माठ |
| तपोवनम्-a Penance grove | तपोवन | तपस्या करणजो बन |
| अनिद्रौ-Sleepless | निद्रा रहित | सुजाग |
| समाहितः भव-Be alert | ध्यान धरो | संभ्री वेह |
| पुरोहितः-a Priest | पुरोहित | पुरोहित |
| अज्वलयत्-Kindled | आग सुलगाता है | बाहे बारी |
| यथान्यायम्-In the proper way | उचित रीति से | दस्तूर मूजुब |
| सम्प्रवर्तितः-Begun | आरंभ हुआ | शुरू थिअल |
| क्षणे-In (that) moment | (उसी) क्षणमें | (हुन्न खिन्नमें |
| प्रादुरासीत्-appeared | प्रगट हुआ | पैदा थियो |

---

## चतुर्विंशः पाठः ।

अयम् परिसरः आश्रमपदस्य । अत्र अष्टौ कुटीराः दृश्यन्ते । तथा च त्रयः देवालयाः अपि । त्रयाणाम् देवालयानाम् त्रीणि शिखराणि दृश्यन्ते । आकाशे मारीचः सुबाहुः च दृश्येते । तयोः अनुचराः तु

आलेख्ये न दृश्यन्ते। तेषाम् भयानकेन शब्देन त्रस्ताः पक्षिणः आकाशे उड्डयन्ते। एते आश्रमवासिनः किमर्थम् कुटीरेभ्यः बहिः आगताः ? राक्षसानाम् भयानकः शब्दः एव तेषाम् निर्गमनस्य कारणम्। यदा राक्षसाः आश्रमपदम् त्रासयन्ते, तदा आश्रमवासिनः भीताः भवन्ति। इदानीम् तु राक्षसेभ्यः आश्रमवासिनाम् भयम् न विद्यते, यतः राक्षसैः सह योद्धुम् रामः सज्जः तिष्ठति। वामेन हस्तेन चापम गृहीत्वा, दक्षिणेन हस्तेन ज्यायाम् बाणम् आरोप्य, ताम् च आकर्णम् आकृष्य, सः मारीचस्य शरीरे बाणम् क्षिपति। लक्ष्मणः अपि राक्षसेषु बहून् बाणान् अस्यति।

| | | |
|---|---|---|
| चतुर्विंशः पाठः-24th Lesson | चौवीसवाँ पाठ | सबकु चोवीहों |
| परिसरः-Neighbour-hood | पड़ोस | पस्स गिर्दाई |
| आश्रमपदं-The compound of a hermitage | आश्रमका घेरा | आश्रमजो पारो |
| कुटीराः-Cottages | झोंपड़ी | झूपर्युं |
| देवालयाः-Temples | मंदिर | मंदर |
| शिखराणि-Spires | चोटियाँ | गुंबज़, चोट्युँ |
| अनुचराः-Followers | पीछा करनेवाले | मदद्गार |
| त्रस्ताः, भीताः-Terrified | डरे हुए | ढिन्नल |
| पक्षिणः-Birds | पक्षी | पक्खी |
| उड्डयन्ते-Fly | उडते हैं | उडामणथा |
| निर्गमनम्-Going out | बाहर निकलना | बाहिर अचणु |
| भयम्-Fear | डर, भय | भउ |

| | | |
|---|---|---|
| विद्यते-Is | है | आहे |
| ज्या-a Bow-string | कमानकी डोरी | कमानजी नोरी |
| आकर्णम्-Up to the ear | कान तक | कन्न ताईं |
| आकृष्य-Having drawn | खींच कर | ताणे, छिके |
| क्षिपति, अस्यति-Throws | फेंकता है | हणेथो |

---

## पञ्चविंशः पाठः ।

बाणेन विद्धः मारीचः भूमौ अपतत्। तदा रामः लक्ष्मणम् अवदत्–"पश्य, लक्ष्मण, इमान् अन्यान् अपि यज्ञस्य विघ्नकरान् हनिष्यामि"–इति। हतेषु विघ्नकरेषु राक्षसेषु, ऋषयः रामम् अपूजयन् । अथ समाप्ते यज्ञे, महामुनिः विश्वामित्रः तम् अब्रवीत्–"कृतम् त्वया गुरुवचनम्। कृतार्थः अस्मि अद्य" इति। ताम् रात्रिम् भ्रातरौ राजपुत्रौ आश्रमे एव अवसताम् ।

प्रभातायाम् रात्र्याम्, प्रभातकरणीयानि कृत्वा, विश्वामित्रम् च नमस्कृत्य, तौ अवदताम्–"भगवन्, आवाम् ते किङ्करौ समुपस्थितौ । यथेष्टम् नौ आज्ञापय । तव शासनम् करिष्यावः–" इति । विश्वामित्रः प्रत्यभाषत–"वत्स राम, निःशेषम् हताः यज्ञस्य विघ्नकराः त्वया । अद्य वयम् मिथिलाम् गमिष्यामः। तत्र जनकस्य यज्ञः भविष्यति। अन्यत् अपि अद्भुतम्

मिथिलायाम् द्रष्टव्यम् । अनुसरतम् यदि अस्माभिः सह गमने मतिः भवति–इति ।

| | | |
|---|---|---|
| पञ्चविंशः पाठः–25th Lesson | पच्चीसवाँ पाठ | सबकु पंजवीहो |
| विद्धः–Pierced | छेदा हुआ | टुंब्यल |
| अपतत्–Fell | गिर गया | किर्यो |
| भूमौ–On the ground | पृथ्वीपर | जमीनते |
| हनिष्यामि–(I) Shall kill | मार डालूँगा | मारिंदुसु |
| समाप्तः–Finished | समाप्त | पूरो थिअलु |
| कृतार्थः–happy | कृतार्थ | हासिल् मतलब |
| समुपस्थितौ–Approached | समीप आये हुए | हाज़िर |
| यथेष्टम्–As desired | इच्छा प्रमाणें | मरज़ी मूजुब |
| आज्ञापय– Order | आग्या करो | आग्या कर |
| शासनम्–an Order | आग्या, हुकम | आग्या |
| निःशेषम्–Completely | निःशेष; कुल | पटीअ |
| अद्भुतम्–a Wonder | अद्भुत | अजीबशाय |
| द्रष्टव्यम्–Worth seeing | देखने योग्य | डिस्सण जोगी |
| मतिः–Mind | इच्छा, मर्जी | इरादो |
| अनुसरतम्–Follow | पीछे चलो | पुठयाँ अचजो |

## षड्विंशः पाठः ।

रामः अपृच्छत्—“ भगवन्, किम् नु तत् अद्भुतम् यत् मिथिलायाम् द्रष्टव्यम् ? तत् नौ कथय । महत् हि आवयोः कौतूहलम्—” इति । मुनिः प्रत्यभाषत—“ वत्स राम, शृणु । अस्ति खलु राज्ञः जनकस्य अद्भुतम् धनुः । पुरा तत् शिवेन जनकस्य

पूर्वजाय दत्तम् । तत् च तत्र विदेहानाम् कुले न्यासः इव तिष्ठति । तस्य बलम् अप्रमेयम् । तस्य आरोपणम् कर्तुम् पुरा के अपि न शक्ताः । तस्य धनुषः बलम् ज्ञातुकामाः कतिपयाः महाबलाः राजपुत्राः मिथिलाम् आगताः । तत् आरोपयितुम् तु असमर्थाः । अन्यत् च । राज्ञः जनकस्य एका कन्या भवति सीता नाम । ताम् बहवः नृपाः वृण्वन्ति । यः कः अपि वीरः शिवधनुः आरोप्य स्वबलम् दर्शयिष्यति, तस्मै एव जनकः कन्याम् सीताम् दास्यति, न अन्यस्मै" इति उक्त्वा मुनिश्रेष्ठः मिथिलाम् उद्दिश्य प्रस्थानम् अकरोत् । सलक्ष्मणः रामः अपि तम् अन्वगच्छत् ।

---

| | | |
|---|---|---|
| षड्विंशः पाठः-26th Lesson | छब्बीसवाँ पाठ | सबकु छव्हीहों |
| नौ कथय–Tell us | हमको कहिये | असाँखे बुधाय |
| पूर्वजाय–( to ) An ancestor | वड़ोमें से किसी एकको | अब्बन् डाडनमाँ हिकखे |
| न्यासः इव–As a trust | अमानत सरीखा | अमानत करे |
| अप्रमेयम्–Immense | बे हद्द | बे हद्द |
| आरोपणम्–Fixing up | तैयार करना | तिआर करण |
| के अपि–Some | कोई भी | के ब |
| ज्ञातुकामाः–Those wishing to know | जाननेकी इच्छा वाला | जाणणजी खाहिश् करणवारा |
| महाबलाः–Very strong | महाबलवान | वडु बलुवारा |
| कतिपयाः-Several | बहुतेरे | केत्राह |

| | | |
|---|---|---|
| वृण्वन्ति-They choose | वरनेकी इच्छा करते हैं | मङ्गिणो कंथा |
| मिथिलाम् उद्दिश्य-Towards Mithila | मिथिला तरफ | मिथिला डाँ |
| प्रस्थानम्-Start | चल निकलना | पंधु करणु |
| मुनि-श्रेष्ठः-The best of sages | मुनिश्रेष्ठ | वड्डो रिशि |
| अन्वगच्छत्-Followed | पीछे गया | पुठ्याँ विओ |
| कौतूहलम्-Curiosity | उत्कण्ठा | घणी खाहिश् |
| शृणु-Listen | सुनो | बुधु |
| पुरा-formerly | पहेले | अग्ये जमानेमें |

## सप्तविंशः पाठः ।

अथ ते सर्वे अपि मिथिलाम् प्राप्ताः, यज्ञवाटम् च उपागताः । रामः अब्रवीत्–" अयम् यज्ञवाटः । अत्र नानादेश-निवासिनः वेदाध्ययन-शालिनः ब्राह्मणाः आगताः दृश्यन्ते । अहो शोभना यज्ञ-समृद्धिः महात्मनः जनकस्य ! वयम् कुत्र वत्स्यामः "–इति । रामस्य तत् वचनम् श्रुत्वा, विश्वामित्रः विविक्ते सलिलायुते देशे निवेशम् अकरोत् । विश्वामित्रम् अनुप्राप्तम् श्रुत्वा, राजा जनकः सहसा तस्य समीपम् अगच्छत्, तम् च अपूजयत् । मुनिः तु जनकस्य पूजाम् स्वीकृत्य, तस्य कुशलम् यज्ञस्य च निर्विघ्नताम् अपृच्छत् । राजा अवदत्–" भगवन्, एभिः मुनिभिः सह आसनानि अलङ्क्रियन्ताम् । धन्यः अस्मि, अनुगृहीतः अस्मि, यत् एभिः मुनिभिः सह मम यज्ञोप-

सदनम् प्राप्तः असि "-इति ।

| | | |
|---|---|---|
| सप्तविंशः पाठ-27th Lesson | सत्ताईसवाँ पाठ | सबकु सत्तावीहों |
| यज्ञ-वाटः-Enclosure for Sacrifices | यज्ञका घेरा | जग्ग्यजो इस्थानु |
| उपागताः-Approached | समीप पहुंचे हुए | वेज्झो पोहतलु |
| नाना-देशाः-Various countries | अनेक देश | नानादेस |
| निवासिनः-Residents | निवासी | रहाकू |
| वेदाध्ययनम्-Study of the Vedas | वेद्का अध्ययन | वेदनजो अभ्यास |
| अध्ययन-शालिनः-Studious | अध्ययनशील | अभ्यास करणवारा |
| शोभना-Fine | उत्तम | सुट्ठी |
| ( यज्ञ ) समृद्धिः Pomp (of the sacrifice) | ( यज्ञकी ) ठाठ, | ( जग्ग्यजो ) ठाटु |
| वत्स्यामः-(we) Will stay | ठेहरेंगे | रहंदासूँ |
| विविक्तः-Secluded | एकांत | एकांत |
| सलिलायुतः-With supply of water | जलवाला | पाणीवारो |
| निवेशम् अकरोत्-Encamped | निवास किआ | टिक्कया |
| अनुप्राप्तः-Arrived | पहुंचा हुआ | पोहतलु |
| स्वीकृत्य-Having accepted | स्वीकार कर | स्वीकार करे |
| सहसा-Quickly | जलदी से | झट्ठ |
| निर्विघ्नता-Smooth working | यज्ञकी विघ्नरहिता | बिनारंडक हलण |
| धन्यः-Blessed | धन्य | भागवारो |
| अनुगृहीतः-Obliged | अनुग्रह किआ गया | थोरायितो |
| उपसदनम्-Place | जगह | थल्लो |

## अष्टाविंशः पाठः ।

जनकः बद्धाञ्जलिः अवदत्–“ भगवन्, कौ इमौ कुमारौ वीरौ धनुर्धरौ ? कस्य पुत्रौ ? तत् श्रोतुम् इच्छामि—” इति । जनकस्य तत् वचनम् श्रुत्वा, विश्वामित्रः अवदत्–“राजन्, इमौ क्षत्रियौ अयोध्यानाथस्य दशरथस्य पुत्रौ रामलक्ष्मणौ लोकविश्रुतौ । यत् शैवम् धनुः तव कोशागारे तिष्ठति, तत् द्रष्टुकामौ । तत् आभ्याम् दर्शय । तस्य धनुःश्रेष्ठस्य दर्शनात् कृतकामौ यथेष्टम् गमिष्यतः—” इति । मुनेः तत् वचनम् श्रुत्वा जनकः प्रत्यभाषत–– “ बाढम् । धनुः आभ्याम् दर्शयिष्यामि । अन्यत् च निवेदनीयम् । अस्ति मम कन्या सीता नाम । यः कः अपि वीरः अस्य धनुषः आरोपणम् करिष्यति, तस्मै एव सुताम् सीताम् दास्यामि, न अन्यस्मै इति मे प्रतिज्ञा । वयम् प्रासादम् गच्छाम, धनुः च पश्याम–” इति ।

---

| | | |
|---|---|---|
| अष्टाविंशः पाठः–28th Lesson | अठाईसवाँ पाठ | सबकु अट्ठावीहों |
| बद्धाञ्जलिः–One with folded hands | हाथ जोडा हुआ | हत्थ जोडेल |
| लोक-विश्रुतौ–Well-known | लोकप्रसिद्ध | मशहूर |
| शैवम् धनुः–Shiva's bow | शिवका धनुष्य | शिवजो कमान |



चित्रकारः—श्रीयुत पाटकर.

| | | |
|---|---|---|
| द्रष्टुकामौ-Desirous to see | देखनेकी इच्छा-वाले | डिसणजी मरजी करणवारो |
| कृतकामौ-With wishes fulfilled | कृतार्थ | हासिल् मतलब |
| बाढम्-Yes | हाँ, अच्छा | चङो |
| प्रासादः-a Palace | राजमंदिर | महेल |
| कोशागारम्-treasury | खज़ाना | खज़ानो |
| निवेदनीयम्-To be told | कहनेका | बुधायणो ( आहे ) |

## एकोनत्रिंशः पाठः ।

जनकेन आदिष्टाः सचिवाः कोशागारम् अगच्छन् । कोशागारस्य द्वारम् सदा अर्गलेन पिहितम् अभवत्, यतः बहुमूल्यानि वस्तूनि तत्र रक्षणार्थम् निहितानि आसन् । शिवस्य धनुः अपि तत्र एव निहितम् आसीत् । द्वारम् निरर्गलीकृत्य, बहूनाम् नराणाम् साहाय्येन एकस्याम् अष्टचक्रायाम् मञ्जूषायाम् धनुः निधाय, ताम् च पुरतः कृत्वा, सचिवाः प्रासादस्य प्राङ्गणम् आगच्छन् । बहवः नराः मञ्जूषाम् रज्ज्वा समवहन्, यथा आलेख्ये दृश्यते । आनीतम् धनुः दृष्ट्वा विश्वामित्रः अवदत्—"वत्स राम, पश्य इदम् धनुः—" इति । रामः अपि यत्र सा मञ्जूषा स्थिता तत्र गत्वा, धनुः च दृष्ट्वा अब्रवीत्—"अस्य धनुषः तोलने पूरणे अपि वा यतिष्ये—" इति । "बाढम्, यतस्व" इति राजा

जनकः प्रत्यभाषत ।

| | | |
|---|---|---|
| एकोनत्रिंशः पाठः–29th Lesson | उंतीसवाँ पाठ | सबकु उणटीहों |
| आदिष्टाः–Ordered | आज्ञा किआ हुआ | हुकुम डिनल |
| सचिवाः– Officers | अधिकारी | वज़ीर |
| पिहितम–Shut | बंद | बंद |
| निहितानि–Placed | रखा हुआ | रख्यल |
| अर्गलः–a Bar | खटका | तारी |
| बहुमूल्यानि–Costly | बहुमूल्य | घणे मुल्लवारा |
| वस्तूनि–Things | चीजो, वस्तु | शयुँ |
| निरर्गलीकृत्य–Un-bolting | खटका निकाल कर | तारी कढी |
| अष्टचक्रा–Eight-wheeled | आठ चक्रों वाली | अठ्ठन्फीथन्वारी |
| आयसी–Of iron | लोहेकी | लोहजी |
| मञ्जूषा–a Case | पेटी | संदूक, पेती |
| निधाय–Having placed | रख कर | रखी |
| प्राङ्गणम्–a yard | आँगन | अङणु |
| रज्ज्वा–With a cord | रस्सी से | रस्सीयसाँ |
| समवहन्–dragged | खींचा | गिहिल्यो |
| आनीतम्–Brought | ले आया हुआ | आण्यल |
| तोलनम्–Lifting | उठाना | खणणु |
| पूरणम्–Fitting up | तैयार करना | तिआर करणु |
| यतिष्ये–I shall try | यत्न करूँगा | सायो कंदुसु |

## त्रिंशः पाठः ।

अहो माधुर्यम् अस्य दृश्यस्य ! इदम् प्राङ्गणम् जनकस्य प्रासादस्य । तस्य परस्तात् रम्यम् उपवनम् दृश्यते । प्राङ्गणे च मन्दिरम् भवति । मन्दिरस्य स्तम्भाः सोपानम् च तथा एव प्राङ्गणस्य भूमिः अपि,



चित्रकारा:—श्रीमंत बाळासाहेब पंत प्रतिनिधि, बी. ए., चीफ् ऑफ् औंध.

सर्वाणि धवलानि स्फटिकमयानि दृश्यन्ते। मन्दिरप्रवेशे सिंहासनम्, तस्य उपरि छत्रम् च भवति। सिंहासनस्य अग्रतः वृद्धः राजा जनकः विस्मितः इव तिष्ठति। तस्य दक्षिणतः च तस्य कन्या सीता। सा अपि विस्मिता, किञ्चित् हर्षिता अपि वा दृश्यते। प्राङ्गणे च कतिपयाः जटा-धराः मुनयः, मुकुट-धराः राजपुत्राः, अन्ये च नानाविध-शिरो-वस्त्र-धराः नराः तिष्ठन्ति। सर्वे अपि हस्त-प्रक्षेपात् विस्मिताः इव दृश्यन्ते। किम् नु तत् अद्भुतम् येन एते विस्मयन्ते? एषः श्यामलः रम्यमूर्तिः चाप-धरः कुमारः सर्वेषाम् विस्मयस्य कारणम्। शिवधनुः न केवलम् तेन तोलितम्, किन्तु लीलया पूरयित्वा, मौर्वीम् च आकर्णम् आकृष्य, तेन तत् मध्ये भग्नम् अपि!!!

---

| | | | |
|---|---|---|---|
| त्रिंशः पाठः | 30th Lesson | तीसवाँ पाठ | सबकु टीहों |
| माधुर्यम् | Sweetness | सुंदरता | दिलचस्पी |
| दृश्यम् | a scene | दिखावा | डेखाउ |
| परस्तात् | Beyond | उस पार | पर्यां |
| रम्यम् | Pleasant | रमणीक | मोहिंदर |
| उपवनम् | a garden | फुलवाडी | बाग़ |
| मन्दिरम् | a building | मंदिर | मंदरु |
| स्तम्भाः | Pillars | खंभा | थंभ |
| सोपानम् | Step | सीढ़ी | डाकण |
| स्फटिक-मयानि | Crystalline | जैसे बिलोरसे बने हुए | बिलोर जेहड़ा |
| प्रवेशे | At the entrance | प्रवेशमें | लंघमें, डेढीमें |

| | | | |
|---|---|---|---|
| वृद्धः | Old | बूढा | बुड्डो |
| विस्मितः इव | As if surprised | जैसा आश्चर्यमें खड़ा है | अजबमें पिअल जेहड़ो |
| हर्षिता | Delighted | प्रसन्न | खूश |
| हस्त-प्रक्षेपात् | From the tossing of hands | हाथ उठानेसे | हत्थचलजे करे |
| विस्मयन्ते | Are surprised | आश्चर्यमें हैं | अजबमें पवंथा |
| लीलया | Easily | सहज से | सहँजसाँ |
| मध्ये भग्नम् | Broken in the middle | बीचमें तोड़ा हुआ | विचमें भगलु |
| किञ्चित् | a little | थोड़ा | थोरो |

---

## एकत्रिंशः पाठः ।

"अहो बत महत् चित्रम् ! अहो वीर्यम् अस्य कुमारस्य ! इदम् मया न तार्कितम् ! 'यः कः अपि वीरः शिवधनुषः आरोपणम् करिष्यति, तस्मै एव सीताम् दास्यामि, न अन्यस्मै' इति मम प्रतिज्ञा अद्य सत्या भविष्यति । रामम् भर्तारम् आसाद्य, सीता अस्माकम् कुलस्य कीर्तिम् वर्धयिष्यति । प्राणेभ्यः अपि प्रियाम् मम सुताम् रामाय दास्यामि। अयोध्याम् शीघ्रम् गत्वा दूताः राज्ञे दशरथाय इदम् वृत्तम् कथयन्तु, तम् च मिथिलाम् आनयन्तु" इति उक्त्वा जनकः दूतान् अयोध्याम् अप्रेषयत् । अयोध्याम् गत्वा, दशरथस्य प्रासादम् च प्राप्य, दूताः सिंहासने स्थितम् वृद्धम् नृपम् अपश्यन्, अञ्जलिम् च

बद्ध्वा तम् अवदन्—

| | | |
|---|---|---|
| एकत्रिंशः पाठः–31st Lesson | एकतीस वाँ पाठ | सबकु एकटीहों |
| अहो बत ! O ! | अहाहा ! | अड़े ! |
| महत् चित्रम् a great wonder | महान आश्चर्य | वड्डो अजबु |
| वीर्यम् Prowess | बल | बलु, शक्ति |
| तर्कितम् anticipated | सोच बिचारमें आया | अटकल कयल, भाँयल |
| आसाद्य Having obtained | प्राप्त कर | हत्थ करे, |
| कीर्तिः Fame | कीर्ति | नामूस |
| वर्धयिष्यति Will enhance | बढ़ायँगी | वधाइंदि |
| अस्माकम् Our | हमारा | असांजे |
| दूताः Messengers | दूत | जासूद |
| वृत्तम् News | समाचार | खबर |
| आनयंतु Let them bring | ले आवें | वठी अचन् |
| अप्रेषयत् Sent | भेजा | मोकल्यो |

द्वात्रिंशः पाठः ।

"महाराज, मिथिलानाथः जनकः स्नेह–संयुक्तेन मधुरेण वचनेन देवस्य कुशलम् पृच्छति । मिथिला–वृत्तान्तस्य निवेदनार्थम् वयम् देवस्य समीपम् प्रेषिताः । बहवः राजानः जनकस्य कन्याम् सीताम् अवृण्वन् । राज्ञः जनकस्य प्रतिज्ञा तु 'यः कः अपि वीरः शिवधनुषः आरोपणम् करिष्यति, तस्मै एव सीताम् दास्यामि, न अन्यस्मै' इति

विदिता एव। धनुषः आरोपणे असमर्थाः ते सर्वे अपि राजानः विमुखीभूताः। रामभद्रेण पुनः न केवलम् तत् धनुः आरोपितम्, किन्तु मौर्वीम् आकर्णम् आकृष्य मध्ये भग्नम् अपि ! तस्मात् महाराजः जनकः सीताम् रामाय, ऊर्मिलाम् च लक्ष्मणाय दातुम् इच्छति। देवम् च सपरिवारम् तत्र आह्वयति। श्रुत्वा देवः प्रमाणम्"—इति दूतानाम् वचनेन राजा परम-हर्षितः अभवत्।

| | | |
|---|---|---|
| द्वात्रिंशः पाठः 32nd Lesson | बत्तीसवाँ पाठ | सबकु बट्टीहों |
| स्नेह-संयुक्तम् Affectionate | प्रेमपूर्ण | प्रीतभर्यल |
| मधुरम् Sweet | मधुर | वणंदर |
| वृत्तान्तः news | समाचार | खबरचार |
| समीपम् near | पास | वट्ठु, वेज्झो |
| प्रेषिताः sent | भेजे गये | मोकल्यल् |
| विदिता known | विदित | जाहिर |
| अवृण्वन् asked for | वरनेके लिये आये | मङ्ग्यो हो |
| विमुखीभूताः sent away | विमुख हुए | मोटी वियल् |
| सपरिवारः with retinue | परिवार सहित | परवार समेत |
| परम-हर्षितः highly delighted | बहुत प्रसन्न | डाढो खुश |
| निवेदनार्थम् to inform | निवेदन करनेके लिये | बुधायणु लाय |

## त्रयस्त्रिंशः पाठः।

राजा सचिवान् अब्रवीत्—"श्रुतम् एव भवद्भिः दूतानाम् वचनम्। यदि अयम् सम्बन्धः वः रोचते, शीघ्रम् मिथिलाम् पुरीम् गच्छाम। काल-क्षेपः मा

भवतु–" इति । "बाढम्" इति सचिवाः अब्रुवन् । तेन वचनेन प्रहृष्टः राजा अवदत्–"श्वः गमिष्यामः" इति । दूताः च ताम् रात्रिम् सुखेन अयोध्यायाम् अवसन् ।

व्यतीतायाम् रात्र्याम्, राजा सचिवम् एकम् आदिशत्–" अद्य पुष्कलम् धनम् आदाय, धनाध्यक्षाः अग्रे व्रजन्तु । वसिष्ठवामदेवादयः द्विजाः अग्रे गच्छन्तु । चतुरङ्गम् सैन्यम् च शीघ्रम् सज्जम् भवतु । यथा कालक्षेपः न भवेत्, तथा सम्भाराः क्रियन्ताम्" इति । नृपः रथम् आरुह्य अग्रतः अगच्छत् । चतुरङ्गम् सैन्यम् च तम् अन्वगच्छत् ।

---

| | | |
|---|---|---|
| त्रयस्त्रिंशः पाठः–33rd Lesson | तैंतीसवाँ पाठ | सबकु टेटीहोँ |
| भवद्भिः By your honours | आप महाशयों से | अव्हाँ साहेबन् खाँ |
| सम्बन्धः–Connection | संबंध | मायेटी |
| अयम् वः रोचते–You like this | यह आपको पसंद है | ही अव्हाँखे पसंद आहे |
| श्वः–Tomorrow | कल | सुभाणे |
| व्यतीता–Passed | गुजर चुकी | गुजर्यल् |
| पुष्कलम्–Much | बहुत | गच्च |
| धनाध्यक्षाः–Treasurers | खजाँची | खजानची |
| द्विजाः–Dwijas | द्विज | द्विज |
| चतुरङ्गम्–Four fold | चार अंगोवाले | चइन् प्रकारन् वारो |
| सम्भाराः–Preparations | तैयारी | तिआरी, सांबाहो, |
| क्रियन्ताम्–Let them be made | की जावें | कयी वञे |
| सुखेन–Happily | सुख से | खुशीमें |
| प्रहृष्टः–Pleased | प्रसन्न | खुश थियल |

## चतुस्त्रिंशः पाठः ।

मिथिलाम् उपागतस्य दशरथस्य समीपम् गत्वा, परम–हर्षितः च भूत्वा, जनकः अवदत्—"'महाराज, स्वागतम् ते ! दिष्ट्या प्राप्तः असि । दिष्ट्या सर्वैः द्विज–श्रेष्ठैः सह भगवान् वसिष्ठः प्राप्तः । युष्माभिः सह सम्बन्धेन सम्भावितम् मे कुलम्—" इति । परस्पर–समागमेन परमहर्षितानाम् सर्वेषाम् मुनी-नाम् सुखेन रात्रिः व्यतीता ।

अथ अन्येद्युः समन्त्री सोपाध्यायः सबान्धवः दशरथः जनकस्य प्रासादम् अगच्छत् । 'कन्यायाः प्रतिग्रहे प्रदाने वा कुलम् वक्तव्यम्' इति सम्प्रदायः । तम् अनुसृत्य इक्ष्वाकूणाम् कुलम् कुलगुरुणा वसिष्ठेन परिकीर्तितम् । विदेहानाम् कुलम् तु सर्ववेदशास्त्रेषु प्रवीणेन जनकेन स्वयम् एव परिकीर्तितम् ।

---

| | | |
|---|---|---|
| चतुस्त्रिंशः पाठः 34th Lesson | चौंतिसवाँ पाठ | सबकु चोटीहों |
| स्वागतम् ते ! Welcome to you ! | महाराज स्वागत ! | भली करे आया ! |
| दिष्ट्या I am glad that | अहो भाग के | मुहिँझो वड्डो भाग तह् |
| युष्माभिःसह With you | आपके साथ | अव्हाँसाँ |
| सम्भावितम् Honoured | सन्मान हुआ | मानाइतो थियल |
| परस्परः–Mutual | परस्पर | हिकबेजो, |
| समागमः–Company | मिलाफ | संगु, मेलापु |
| अन्येद्युः–The next day | दूसरे दिन | बिए डींह |

| | | |
|---|---|---|
| बान्धवः-A relation | संबंधी जन | माइटु |
| मन्त्री-A counsellor | मंत्री (वज़ीर) | सलाहकार |
| प्रतिग्रहे-When receiving | ग्रहण के समय | वठण महेल |
| प्रदाने-When giving | दान के समय | डियणमहेल |
| कुलम् वक्तव्यम्-The family has to be described | कुल बतलाना | कुलु बुधायजे |
| सम्प्रदायः-A custom | चाल, रीत | रस्सम, रिवाज |
| परिकीर्तितम्-Described | वर्णन किया हुआ | बुधायल |
| प्रवीणः-Skilled | कुशल | वाकुफ |
| उपागतः-Approached | पास पहुंचे हुआ | वेज्झो आयलु |
| स्वयम् एव-Personally | खुद | पाण |
| अनुसृत्य-Following | अनुसार | मूजुब् |

## पञ्चत्रिंशः पाठः ।

दशरथः—मम पुत्रयोः रामलक्ष्मणयोः अर्थे तव सुते वरये ।

जनकः (सहर्षम्)—वध्वौ ददामि, सीताम् रामाय, द्वितीयाम् ऊर्मिलाम् च लक्ष्मणाय । अत्र न संशयः ।

विश्वामित्रः—अनुपमम् अत्रभवतोः कुलद्वयम् । योग्यः च अयम् धर्म-सम्बन्धः। रामलक्ष्मणयोः सीतोर्मिलाभ्याम् सह सम्बन्धः रूपेण अपि योग्यः एव । अन्यत् च *यत् वसिष्ठस्य मम च वाञ्छितम् तत् श्रूयताम्। तव यवीयसः भ्रातुः राज्ञः कुशध्वजस्य सुते, माण्डवीम् श्रुतकीर्तिम् च, भरतशत्रुघ्नाभ्याम् दातुम् अर्हसि।

जनकः ( बद्धाञ्जलिः )—निजकुलम् धन्यम् मन्ये यत् अस्माकम् ईप्सितम् अनायासेन एव लभ्यते। एवम् भवतु। उभौ भरतशत्रुघ्नौ अपि भार्ये भजेताम्। एकस्मिन् एव दिने चत्वारः वराः चतसृणाम् वधूनाम् पाणीन् गृह्णन्तु।

( एवम् निर्वृत्ते वाङ्निश्चये, जनकम् आपृच्छय दशरथः स्वम् आलयम् अगच्छत्। विवाहपूर्वकान् संस्कारान् च अकरोत्। )

---

| | | | |
|---|---|---|---|
| पंचत्रिंशः पाठः | 35th Lesson | पैंतीसवाँ पाठ | सबकु पंजटीहों |
| पुत्रयोः अर्थे | For (two) sons | पुत्रोंके लिए | पुट्टनजे लाय |
| वरये | I ask for | बरना चाहता हूँ ? | मङणो कन्याँथो |
| सहर्षम् | With delight | हर्षके साथ | खुश थी |
| वधूः | A young woman | कुमारी | कुँवाँर |
| ददामि | I give | देता हूँ | डियाँथो |
| अनुपमम् | Unequalled | बे ज़ोड | बेनजीरु |
| कुलद्वयम् | Both families | दो कुल | बइ कुल |
| अत्रभवतोः | Of your Honours | आप महाशयोंका | अव्हाँ साहिबनजा |
| रूपम् | Beauty | रूप | सूँह |
| वाञ्छितम् | Desired object | कामना | मनमें घुर्यल |
| यवीयान् भ्राता | Younger brother | छोटा भाई | नंढो भाउ |
| दातुम् अर्हसि | You should give | आपको देना चाहिये | तोखे डियण घुर्जे |
| निज-कुलम् | Own family | आपना कुल | पहिँजो कुलु |

| | | |
|---|---|---|
| ईप्सितम् Desired object | मनोकामना | मनमे घुर्येल |
| अनायासेन Without difficulty | सहज ही | सहँज साँ |
| भार्ये भजेताम्-Let(them) marry | विवाह करें | शादी कन् |
| निर्वृत्तः-Finished | पूरा हुआ | पूरो थियल |
| वाङ्निश्चयः-Verbal agreement | वाग्दान | वाग्दान, मङणो |
| आलयः-Residence | डेरा | जाय |
| आपृच्छ्य-Bidding farewell | छुट्टी लेकर | मोकलाए |
| विवाह-पूर्वकाः-Preceding the marriage | विवाहके पेहलेके | विहाँवखाँ अग्गयेयजा |
| संस्काराः-Ceremonies | संस्कार | सनस्कार |
| वराः-Bride-grooms | बर | घोट |

---

## षट्त्रिंशः पाठः ।

अथ अपरेद्युः युक्ते मुहूर्ते वसिष्ठादयः ऋषयः वरैः सह यज्ञवाटम् उद्दिश्य प्रस्थिताः । तत्र गत्वा आभरणभूषिताः रामादयः पितुः समीपम् अतिष्ठन् । राजपुत्रीभिः सहितः जनकः वेदीसमीपम् स्थित्वा तान् प्रत्यैक्षत । वेदी गन्धपुष्पादिभिः अलङ्कृता आसीत् । वेदीम् परितः च विविधानि अर्घ्यपात्राणि स्थितानि । वेद्याम् मन्त्रपूर्वकम् अग्निम् आधाय वसिष्ठः अजुहोत् । ततः सीताम् समानीय, ताम् च रामस्य अभिमुखम् संस्थाप्य, अग्नेः समक्षम् जनकः अवदत्— "इयम् सीता मम सुता तव सहधर्मचारिणी । एनाम् प्रतीच्छ । पाणिना पाणिम् गृहाण । लक्ष्मण, आगच्छ ।

ऊर्मिलाम् प्रतीच्छ। पाणिना पाणिम् गृहाण। भरत, आगच्छ। माण्डव्याः पाणिम् पाणिना गृहाण। शत्रुघ्न, आगच्छ। श्रुतकीर्त्याः पाणिम् पाणिना गृहाण। पतिव्रताः छायाः इव एताः युष्मान् अनुगमिष्यान्ति" (इति उक्त्वा राजा तेषाम् हस्तेषु मन्त्रपूतम् जलम् प्राक्षिपत्)

"सर्वे भवन्तः सौम्याः च सुचरितव्रताः च भार्याभिः सहिताः सन्तु" इति।

जनकस्य तत् वचनम् श्रुत्वा चत्वारः वराः चतसृणाम् वधूनाम् हस्तान् हस्तैः अस्पृशन्। सभार्याः अग्निम् राजानम् ऋषीन् च प्रदक्षिणी-कृत्य, विधिपूर्वकम् विवाहम् अकुर्वन्।

---

| | | |
|---|---|---|
| षट्त्रिंशः पाठः-36th Lesson | छत्तीसवाँ पाठ | सबकु छट्टीहोँ |
| अपरेद्युः- The next day | दूसरे दिन | बिए डीहँ |
| युक्ते मुहूर्ते-At the appointed time | नियत मुहूर्तपर | मुकरर कियल वेलाते |
| आभरणानि-Ornaments | गहना भूषण | मण्यामुंड्युँ, सिंगार |
| भूषिताः-Adorned | सज हुआ | सिंगारियल |
| पितुः समीपम्-Near the father | पिताके समीप | पिताजे वेज्झो |
| प्रत्यैक्षत-Awaited | प्रतीक्षा किई | तरस्यो, वाट्ट दिट्ठी |
| अलङ्कृता-Adorned | सज हुआ | सोभ्यावान् कियल |
| वेदीं परितः-Round the altar | वेदीके चारों तरफ | वेदीयजे चौधारी |

| | | |
|---|---|---|
| पात्राणि-Vessels | पात्र | बर्तन |
| अजुहोत्-Performed sacrifice | होम किया | होम कयो |
| समानीय-Having brought | ला कर | आणे |
| अभिमुखम् संस्थाप्य-Placing with the face towards | अभिमुख खड़ा कर के | साँम्हू विहारे |
| अग्नेः समक्षम्-In the presence of fire | अग्नीके सामने | अग्नीयखे साखी करे |
| सहधर्मचारिणी-Helpmate | धर्मपत्नी | धरमपत्नी |
| प्रतीच्छ-Accept | ग्रहण कर | स्वीकार करु |
| पाणिः-A hand | हाथ | हत्थु |
| छाया-A shadow | छाया | छाँव |
| पतिव्रता-Dutiful to husband | पतिव्रता | पतिव्रता |
| प्रदक्षिणीकृत्य-Going round | फेरा देकर | फेरा डेइ |
| सर्वे भवन्तः- All of you | आप सब महाशय | अव्हीं सब साहेब |
| सौम्याः-Gentle | शांत स्वभावका | सांतिका |
| सुचरितव्रताः-Of good character | अच्छी चाल वाले | चङी चालवारा |

---

## सप्तत्रिंशः पाठः ।

एवम् निर्वृत्ते विवाहे, विश्वामित्रः महामुनिः राजानौ आपृच्छ्य स्वम् आश्रमम् अगच्छत् । गते च विश्वामित्रे, दशरथः अपि जनकम् आपृच्छ्य अयोध्याम् उद्दिश्य प्रस्थानम् अकरोत् ।

अथ अयोध्याम् गच्छतः दशरथस्य परिवारः मार्गे सहसा एव ससम्भ्रमः अभवत्। जटा-धरः जमदग्नि-पुत्रः परशुरामः तस्य सम्भ्रमस्य कारणम्। तस्य पिता जमदग्निः केनचित् क्षत्रियेण हतः। तस्मात् तेन क्षत्रियकुलानि अनेकशः उत्सादितानि। 'कच्चित् न दशरथस्य कुलम् अद्य एषः उत्सादयिष्यति ?' इति सर्वे मिथः अजल्पन्।

वसिष्ठप्रमुखाः ऋषयः अर्घ्येण जामदग्न्यम् रामम् अपूजयन्। ताम् ऋषिदत्ताम् पूजाम् प्रतिगृह्य, जामदग्न्यः रामः दाशरथिम् रामम् अभ्यभाषत-"राम, दाशरथे राम, श्रुतम् मया तव वीर्यम्। श्रुतम् च तत् शिवधनुषः भेदनम्। पश्य इदम् अपरम् महत् धनुः। इदम् वैष्णवम्। अस्मिन् बाणम् आरोप्य स्वम् बलम् दर्शय। यदि शक्नोषि, द्वन्द्वम् ते दास्यामि" इति। १३ फरवरी १९३१ ई०

| | | |
|---|---|---|
| सप्तत्रिंशः पाठः-37th Lesson | सैंतीसवाँ पाठ | सत्रकु सत्तटीहो |
| परिवारः-Retinue | परिवार | परवार |
| ससम्भ्रमः-Agitated | घबड़ाया हुआ | मुंझ्यल |
| सम्भ्रमः-Flurry, agitation | घबड़ाहट | मुंझारो |
| अनेकशः-Many times | अनेक बार | घणेइ भेरा |



चित्रकाराः—श्रीमंत बाळासाहेब पंत प्रतिनिधि, बी. ए., चीफ् ऑफ् औंध.

| | | |
|---|---|---|
| कच्चित् न ?-Let us hope he won't | शायद ? | कीं न ? |
| मिथः अजल्पन्-Whispered | आपसमें बोल-चाल करने लगे | पाणमें सुस्पुस करण लगा |
| प्रमुखः-Leader | मुख्य | अगवाणु |
| जामदग्न्यः-Son of जमदग्नि | जमदग्नीका पुत्र | जमदग्नीजो पुट्ट |
| दाशरथिः-Son of दशरथ | दशरथका पुत्र | दशरथजो पुट्ट |
| भेदनम्-Breaking | तोड़ना | भञणु |
| वैष्णवम्-Belonging to Vishnu | विष्णूका | विष्णुनजो |
| शक्नोषि-You can | समर्थ है | सघीं थो |
| द्वन्द्वम्-A duel | कुश्ती | ( बिन्नजो ) जुद्ध |

## अष्टत्रिंशः पाठः ।

परशुरामस्य तत् वचनम् श्रुत्वा, विषण्णवदनः दीनः बद्धाञ्जलिः दशरथः अवदत्-" भगवन्, मम पुत्राः अद्यापि बालाः एव । बालेभ्यः अभयम् दातुम् अर्हसि । एकस्मिन् रामे हते, कथम् नु वयम् जीवाम ? सर्वविनाशम् मा कुरु"-इति । ऋषयः अपि अब्रुवन् " भगवन्, जामदग्न्य, प्रसीद । क्षमा वीरस्य भूषणम् "-इति । क्रुद्धः दाशरथिः तु जामदग्न्यस्य हस्तात् तत् वैष्णवम् धनुः बाणम् च प्रतिगृह्य अवदत्-"यदि माम् अवजानासि, पश्य एनम् मे पराक्रमम्" इति, धनुषि बाणम् च सन्धाय जामदग्न्यम् अब्रवीत्-"अयम् वैष्णवः बाणः मोघः न पतति । ब्राह्मणः असि इति मम पूज्यः । तस्मात् इमम् प्राण-

हरम् बाणम् त्वयि मोक्तुम् न इच्छामि—"इति।"
तत् महत् अद्भुतम् दृष्ट्वा परशुरामः गर्वपरिहारात् जडीकृतः अभवत्।

एवम् निर्जिते परशुरामे, निर्विघ्नः परमहर्षितः दशरथः अयोध्याम् उद्दिश्य प्रस्थितः, तत्र प्राप्तः च। राज-प्रवेश-समये पुरी सिक्त-राजपथा प्रकीर्ण-कुसुमोत्करा नाना-ध्वजालङ्कृता मङ्गल-वादन-निनादिता जनौघ-समलङ्कृता च अभवत्। पौराणाम् च महान् उत्सवः आसीत्।

---

| | | |
|---|---|---|
| अष्टत्रिंशः-पाठः 38th Lesson: | अड़तीसवाँ पाठ | सबकु अठटीहों |
| विषण्णम्-Dejected | उदास | कोमायल |
| वदनम्-The face | चेहरा | मूँहुँ |
| दीनः-Helpless | दीन | मिस्कीन |
| अभयम् प्रयच्छ-Promise safety | अभयदान दो | बेडपो कर |
| सर्व-विनाशः-Destruction of all | सबका नाश | बरबादी |
| अवजानासि-(you) slight | छोटा समझताहै | घट समझी थों |
| पराक्रमः-Valour | पराक्रम | बल्लु |
| मोघः-Fruitless | व्यर्थ | अजायो |
| प्राणहरः-Deadly | प्राणनाशक | प्राण कढंदर |
| मोक्तुम्-To let off | छोड़नेके लिए | छडण लाय |
| गर्व-परिहारात्-The pride being cast off | अहंकारके दूर होनेसे | गर्व दूर थियण करे |
| जडीकृतः-Stupefied | जड जैसा | मोगो |

| | | |
|---|---|---|
| राज-प्रवेशः-Royal entry | राजप्रवेश | राजाजो घिरणु |
| सिक्तः-Sprinkled | छिड़का हुआ | छिन्कार्यल् |
| मङ्गल-वादनम्-Auspicious music | मंगलका बाजा | मंगल गीत |
| ध्वजाः-Flags | झंडे | झंडा |
| जनौघः-Crowds of people | जनसमूह | माण्हुनजो मेड़ु |
| पौराः-Citizens | पुरवासी | नगरवासी |
| उत्सवः-A festival | उत्सव | जशन् |
| प्रसीद्-Be calm | प्रसन्न हो | प्रसन्न थीउ |
| निनादिता-Resounding | बजता हुआ | पलोउसाँ भर्यल् |
| प्रकीर्णः-Scattered | बिखरा हुआ | विखेरियल् |
| कुसुमोत्करः-A heap of flowers | फूलोंका समूह | गुलन्जो ढेर |

---

## एकोनचत्वारिंशः पाठः ।

छात्रः अशोकः—भगवन्, श्रुतम् मया श्रीरामस्य रमणीयम् वृत्तम् विवाहपर्यन्तम् । प्रष्टव्यम् च किञ्चित् भवति—अपि भवति स्म रामस्य प्रीतिः कथासु ?

गुरुः—अथ किम् । विश्वामित्र-समागमे रामेण नानाविधाः चित्राः रम्याः च कथाः श्रुताः एव । यथा । वामनरूपस्य विष्णोः । भगीरथ-प्रयत्नानाम् । नृपस्य विश्वामित्रस्य ब्रह्मर्षिपदगतस्य । तासाम् सर्वासाम् कथानाम् अत्र अवसरः न विद्यते । श्रीसुबोध-संस्कृतम् तथा च व्याकरणम् अपि किञ्चित् अधीष्व । अथ सुपरिचितेषु गीर्वाणवाणी-रचना-विशेषेषु,

श्रीमद्वाल्मिकीये रामायणे ताः ताः चित्रकथाः समग्रम् च रामचरितम् पठिष्यसि ।

शुभम् भवतु ।

| | | |
|---|---|---|
| एकोनचत्वारिंशःपाठः–39 th Lesson | उंचालीसवाँ पाठ | सबकु उणेतालीहो |
| प्रष्टव्यम्–To be asked | पूछनेका | पुछणो ( आहे ) |
| छात्रः–A pupil | शिष्य | शागिर्द |
| चित्राः कथाः–Wonderful stories | विचित्र कथा | विचित्रकथाउँ |
| अथ किम्–Certainly! | हाँ ! | हाउ ! |
| अवसरः-Scope | अवसर | मवको |
| व्याकरणम्-Grammar | व्याकरण | व्याकरणु |
| अधीष्व–Study | अध्ययन करो | पढ़ |
| सुपरिचितः–Familiar | अच्छा जाना हुआ | चङी रीत मायलुम |
| गीर्वाण-वाणी–Sanskrit | संस्कृत भाषा | संस्कृतभाषा |
| रचना-विशेषः–Idiom | सुरचना | मुहाविरो |
| ताः ताः कथाः–The various stories | वे वे चित्र | उहे उहे कथाऊँ |
| समग्रम्-Entire | सारा | समूरो |
| नानाविधाः–Various | नाना प्रकारका | घणे किसमजा |
| विवाहपर्यन्तम्–As far as the marriage | विवाह तक | विहाँउ ताँई |
| शुभम्- Auspiciousness | शुभ | कल्याणु |

## Notes

Clear and correct pronunciation should be insisted upon in reading Sanskrit.

The pupil should be encouraged to notice points of contrast and similarity between Sanskrit and his mother-tongue; *e. g.* the position of च, वा and तु; the genders; the numbers etc.

Rama ( and ) Laxman.
But रामः लक्ष्मणः (च)।
or रामः (च) लक्ष्मणः (च)।
Hunger ( or ) Thirst.
But क्षुधा पिपासा (वा)।
or क्षुधा (वा) पिपासा (वा)।

The following will be found to be interesting:—

| Sk | Hindi | Marathi | Gujrathi | Sindhi | Kanarese |
|---|---|---|---|---|---|
| यत्र | जिधर | जेथें | ज्यां | जित्ते | यल्ले |
| तत्र | तिधर | तेथें | त्यां | तित्ते | अल्ले |
| कुत्र? | किधर? | कोठें? | क्यां? | किथे? | यल्ले? |
| यदा | जब | जेव्हां | ज्यारे | जडुहीँ | यावाग |
| तदा | तब | तेव्हां | त्यारे | तडुहीँ | आवाग |
| कदा? | कब? | केव्हां? | क्यारे? | कडुहीँ? | यावाग? |
| यस्य | जिसका | ज्याचा | जेनो | जँहिँजो | यावन |
| तस्य | उसका | त्याचा | तेनो | तँहिँजो | अवन |
| कस्य? | किसका? | कोणाचा? | केनो? | कँहिँजो? | यावन? |
| यथा | जैसा | जसें | जेम | जीएँ | यंथा |
| तथा | वैसा | तसें | तेम | तीएँ | अंथा |
| कथम्? | कैसा? | कसें? | केम? | कीएँ? | यंथा? |
| यादृशः | जैसा | जसा | जेवो | जेहड़ो | याव प्रकारद |
| तादृशः | वैसा | तसा | तेवो | तेहड़ो | आ प्रकारद |
| कीदृशः? | कैसा? | कसा? | केवो? | केहड़ो? | याव प्रकारद? |

The following will be found to be helpful.

| | एक-व० | द्वि-व० | बहु-व० | एक-व० | द्वि-व० | बहु-व० |
|---|---|---|---|---|---|---|
| प्रथमा | यः | यौ | ये | या | ये | याः |
| | सः | तौ | ते | सा | ते | ताः |
| | कः ? | कौ ? | के ? | का ? | के ? | काः ? |
| द्वितीया | यम् | यौ | यान् | याम् | ये | याः |
| | तम् | तौ | तान् | ताम् | ते | ताः |
| | कम् ? | कौ ? | कान् ? | काम् ? | के ? | काः ? |
| तृतीया | येन | याभ्याम् | यैः | यया | याभ्याम् | याभिः |
| | तेन | ताभ्याम् | तैः | तया | ताभ्याम् | ताभिः |
| | केन ? | काभ्याम् ? | कैः ? | कया ? | काभ्याम् ? | काभिः ? |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः | यस्यै | याभ्याम् | याभ्यः |
| | तस्मै | ताभ्याम् | तेभ्यः | तस्यै | ताभ्याम् | ताभ्यः |
| | कस्मै ? | काभ्याम्? | केभ्यः ? | कस्यै ? | काभ्याम् ? | काभ्यः ? |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः | यस्याः | याभ्याम् | याभ्यः |
| | तस्मात् | ताभ्याम् | तेभ्यः | तस्याः | ताभ्याम् | ताभ्यः |
| | कस्मात् ? | काभ्याम्? | केभ्यः ? | कस्याः ? | काभ्याम् ? | काभ्यः ? |
| षष्ठी | यस्य | ययोः | येषाम् | यस्याः | ययोः | यासाम् |
| | तस्य | तयोः | तेषाम् | तस्याः | तयोः | तासाम् |
| | कस्य? | कयोः ? | केषाम् ? | कस्याः ? | कयोः ? | कासाम् ? |
| सप्तमी | यस्मिन् | ययोः | येषु | यस्याम् | ययोः | यासु |
| | तस्मिन् | तयोः | तेषु | तस्याम् | तयोः | तासु |
| | कस्मिन् ? | कयोः ? | केषु ? | कस्याम् ? | कयोः ? | कासु ? |

| | | | |
|---|---|---|---|
| प्रथमा and द्वितीया | यत् | ये | यानि |
| | तत् | ते | तानि |
| | किम् ? | के ? | कानि ? |

The forms of तृ० च० &c will be:-

येन याभ्याम् यैः

यस्मै &c &c as above

The following are the pronouns in Sanskrit :—

| | एकवचनम् (one) | | द्विवचनम् (two) | | बहुवचनम् (three or more) |
|---|---|---|---|---|---|
| I | अहम् | we | आवाम् | we | वयम् |
| Thou | त्वम् | you | युवाम् | you | यूयम् |
| He | सः | They | तौ | They | ते |
| She | सा | ,, | ते | ,, | ताः |
| It | तत् | ,, | ते | ,, | तानि |

The following sentence and verse will serve to bring home to the pupil the significance of Sanskrit cases

( विभक्त्यर्थः )

| | (प्र०) | (द्वि०) | (वर्त०) | | (सं०) |
|---|---|---|---|---|---|
| Sk | लक्ष्मणः | रामं | वदति— | "हे | राम, |
| H | लक्ष्मण | रामको | कहता है— | "हे | राम, |
| M | लक्ष्मण | रामास | ह्मणतो—(कीं) | "हे | रामा, |
| G | लक्ष्मण | रामने | कहे छे—(के) | "हे | राम, |
| S | लक्ष्मण | रामखे | चवे थो (तह) | "हे | राम, |
| E | Laxman | (to)Rama | Says | "O | Râma, |
| K | लक्ष्मणनु | रामनिगे | हेळुत्ताने | "यले | रामने, |

| | (तृ०) | द्वि०) | (आज्ञा०) | | (च०) | (द्वि०) | |
|---|---|---|---|---|---|---|---|
| Sk | बाणेन | रावणं | मारय | | बिभीषणाय | राज्यं च | प्रयच्छ |
| H | बाणसे | रावणको | मारो; | (और) | बिभीषणको | राज्य | दो. |
| M | बाणानें | रावणास | मार; | (आणि) | बिभीषणाला | राज्य | दे. |
| G | बाणथी | रावणने | मार; | (अने) | बिभीषणने | राज्य | आप. |
| S | बाणसाँ | रावण | मार; | (अइँ) | बिभीषणखे | राज्ञु | दे. |
| E | with arrow | Ravan | kill | (and) | to Bibhishan | Kingdom | give |
| K | बाणदिंद | रावणनन्नु | होडि | (मत्तु) | बिभीषणनिगे | राज्यवन्नु | कोडु |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | (भविष्य०) | | (षष्ठी) |
| Sk | तेन | त्वं | ख्यातः | भविष्यसि" इति। | यतः | बिभीषणस्य |
| H | इस रीतिसे | तुम् | विख्यात | होओगे " | क्योंकि | बिभीषणकी |
| M | त्यामुळें | तूं | प्रख्यात | होशील " | ज्याअर्थी | बिभीषणाची |
| G | तेनाथी | तूं | प्रसिद्ध | थशे " | जेथी | बिभीषणनी |
| S | तह् | तूं | मशहूर | थींदे " | जिएँ तह् | बिभीषणजी |
| E | thereby | you | famous | will be | Since | of Bibhishan |
| K | अदरिंद | नीनु | प्रख्यातनु | आगुवि " | | बिभीषणन |

| | | | | | | |
|---|---|---|---|---|---|---|
| | (स०) | (प्र०) | (भूत०) | (प्र०) | | (पं०) |
| Sk | रामे | भक्तिः | अभवत्, | रामः | अपि | वचनात् |
| H | राममें | भक्ति | थी, | राम | भी | वचनसे |
| M | रामावर | भक्ति | होती,(त्याअर्थी) | राम | पण | वचनापासून |
| G | राममां | भक्ति | हती, (तेथी) | राम | पण | वचनथी |
| S | राममें | भक्ति | हुई, | राम | ब | वचनखाँ |
| E | in Rama | devotion | was, | Rama | too | from (his) promise |
| K | | भक्ति रामनल्लि | इद्दंते, | रामनु | | वचनदिंद |

| | | |
|---|---|---|
| | | (भूत०) |
| Sk | न | अचलत्। |
| H | न | हटा. |
| M | | ढळला नाहीं. |
| G | न | डग्यो. |
| S | न | हट्यो |
| E | not | moved. |
| K | | भ्रष्टनु आगलिल्ल |

रामो राजमणिः सदा विजयते रामं रमेशं भजे।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः॥
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्।
रामे चित्तलयः सदा भवतु मे हे राम मामुद्धर॥

## रूपावलिः

Whenever the pupil comes across any new form of a noun or a verb, he should get into the habit of searching for a *similar* form in the following. This will ensure accuracy.

| | एकव० | द्विव० | बहुवचनम् |
|---|---|---|---|
| १ प्रथमा | बालकः | बालकौ | बालकाः |
| २ द्वितीया | बालकम् | बालकौ | बालकान् |
| ३ तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| ४ चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| ५ पञ्चमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| ६ षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| ७ सप्तमी | बालके | बालकयोः | बालकेषु |
| ८ संबोधनम् | हे बालक | हे बालकौ | हे बालकाः |

Similarly रामः विश्वामित्रः, राक्षसः etc.

| | | | |
|---|---|---|---|
| १ प्रथमा | वनम् | वने | वनानि |
| २ द्वितीया | वनम् | वने | वनानि |
| ३ तृतीया | वनेन | वनाभ्याम् | वनैः |
| ४ चतुर्थी | वनाय | वनाभ्याम् | वनेभ्यः |
| ५ पञ्चमी | वनात् | वनाभ्याम् | वनेभ्यः |
| ६ षष्ठी | वनस्य | वनयोः | वनानाम् |
| ७ सप्तमी | वने | वनयोः | वनेषु |
| ८ संबोध० | हे वन | हे वने | हे वनानि |

Similarly ज्ञानम्, शयनम्, जलम, अस्त्रम् &c.

Note that the forms are exactly alike for बालकः and वनम् except in 1,2,and,8.

| | | | |
|---|---|---|---|
| १ प्रथमा | गुरुः | गुरू | गुरवः |
| २ द्वितीया | गुरुम् | गुरू | गुरून् |
| ३ तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| ४ चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| ५ पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| ६ षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| ७ सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| ८ संबोध० | हे गुरो | हे गुरू | हे गुरवः |

Similarly. भानुः, सुबाहुः &c

| | | | |
|---|---|---|---|
| १ प्रथमा | मुनिः | मुनी | मुनयः |
| २ द्वितीया | मुनिम् | मुनी | मुनीन् |

| | एकवचनम् | द्विव० | बहुवचनम् |
|---|---|---|---|
| ३ तृतीया | मुनिना | मुनिभ्याम् | मुनिभिः |
| ४ चतुर्थी | मुनये | मुनिभ्याम् | मुनिभ्यः |
| ५ पञ्चमी | मुनेः | मुनिभ्याम् | मुनिभ्यः |
| ६ षष्ठी | मुनेः | मुन्योः | मुनीनाम् |
| ७ सप्तमी | मुनौ | मुन्योः | मुनिषु |
| ८ संबोध० | हे मुने | हे मुनी | हे मुनयः |

Similarly. रविः अतिथिः &c.

| | | | |
|---|---|---|---|
| १ प्रथमा | पिता | पितरौ | पितरः |
| २ द्वितीया | पितरम् | पितरौ | पितॄन् |
| ३ तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| ४ चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| ५ पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| ६ षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| ७ सप्तमी | पितरि | पित्रोः | पितृषु |
| ८ संबोध० | हे पितर् | हे पितरौ | हे पितरः |

Similarly भ्राता ( भ्रातृ ); जामाता (जामातृ) &c

| | | | |
|---|---|---|---|
| १ प्रथमा | कन्या | कन्ये | कन्याः |
| २ द्वितीया | कन्याम् | कन्ये | कन्याः |
| ३ तृतीया | कन्यया | कन्याभ्याम् | कन्याभिः |
| ४ चतुर्थी | कन्यायै | कन्याभ्याम् | कन्याभ्यः |
| ५ पञ्चमी | कन्यायाः | कन्याभ्याम् | कन्याभ्यः |
| ६ षष्ठी | कन्यायाः | कन्ययोः | कन्यानाम् |
| ७ सप्तमी | कन्यायाम् | कन्ययोः | कन्यासु |
| ८ संबोध० | हे कन्ये | हे कन्ये | हे कन्याः |

Similarly शाला, दिशा, विद्या, ताटका &c

| | | | |
|---|---|---|---|
| १ प्र० | नदी | नद्यौ | नद्यः |
| २ द्वि० | नदीम् | नद्यौ | नदीः |
| ३ तृ० | नद्या | नदीभ्याम् | नदीभिः |
| ४ च० | नद्यै | नदीभ्याम् | नदीभ्यः |
| ५ पं० | नद्याः | नदीभ्याम् | नदीभ्यः |
| ६ ष० | नद्याः | नद्योः | नदीनाम् |

| | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| ७ स० | नद्याम् | नद्योः | नदीषु |
| ८ सं० | हे नदि | हे नद्यौ | हे नद्यः |

Similarly राक्षसी, नारी, कैकेयी, मौर्वी &c

| | | | |
|---|---|---|---|
| १ प्र० | भूमिः | भूमी | भूमयः |
| २ द्वि० | भूमिम् | भूमी | भूमीः |
| ३ तृ० | भूम्या | भूमिभ्याम् | भूमिभिः |
| ४ च० | भूमये or भूम्यै | भूमिभ्याम् | भूमिभ्यः |
| ५ पं० | भूमेः or भूम्याः | भूमिभ्याम् | भूमिभ्यः |
| ६ ष० | भूमेः or भूम्याः | भूम्योः | भूमीनाम् |
| ७ स० | भूमौ or भूम्याम् | भूम्योः | भूमिषु |
| ८ सं० | हे भूमे | हे भूमी | हे भूमयः |

Similarly मतिः, रात्रिः, &c

(Compare the forms of भूमिः with those of मुनिः)

I वर्तमान कालः वद्-ति

| | (एकवचनम्) | (द्वि-वचनम्) | (बहु-वचनम्) |
|---|---|---|---|
| १ प्र० पुरुष | वदा-मि | वदा-वः | वदा-मः |
| २ द्वि० पुरुष | वद्-सि | वद्-थः | वद्-थ |
| ३ तृ० पुरुष | वद्-ति | वद्-तः | वद्-न्ति |

II आज्ञार्थः—

| | | | |
|---|---|---|---|
| १ प्र० पुरुष | वदा-नि | वदा-व | वदा-म |
| २ द्वि० पुरुष | वद | वद्-तम् | वद्-त |
| ३ तृ० पुरुष | वद्-तु | वद्-ताम् | वद्-न्तु |

III भूतकालः

| | | | |
|---|---|---|---|
| १ प्र० पु० | अ-वद्-म् | अ-वदा-व | अ-वदा-म |
| २ द्वि० पु० | अ-वदः | अ-वद्-तम् | अ-वद्-त |
| ३ तृ० पु० | अ-वद्-त् | अ-वद्-ताम् | अ-वद्-न् |

| Similarly:- | I वर्तमानकालः | II आज्ञार्थः | III भूतकालः |
|---|---|---|---|
| ३ तृ० पु० | पठ-ति | पठ-तु | अ-पठ-त् |
| ३ ,, | क्रुध्य-ति | क्रुध्य-तु | अ-क्रुध्य-त् |
| ३ ,, | क्षिप-ति | क्षिप-तु | अ-क्षिप-त् |
| ३ ,, | भक्षय-ति | भक्षय-तु | अ-भक्षय-त् |

| IV भविष्यकालः | एकवच० | द्विव० | बहुव० |
|---|---|---|---|
| १ प्र० पु० | वदि-ष्या-मि | वदि-ष्या-वः | वदि-ष्या-मः |
| २ द्वि० पु० | वदि-ष्य-सि | वदि-ष्य-थः | वदि-ष्य-थ |
| ३ तृ० पु० | वदि-ष्य-ति | वदि-ष्य-तः | वदि-ष्य-न्ति |

Similarly:

| | | | |
|---|---|---|---|
| पठि-ष्य-ति-(१) | पठि-ष्यामि | पठि-ष्यावः | पठि-ष्यामः |
| दा-स्य-ति-(१) | दा-स्यामि | दा-स्यावः | दा-स्यामः |

I वर्तमानकालः क्षम-ते

| | | | |
|---|---|---|---|
| १ प्र० पु० | क्षमे | क्षमा-वहे | क्षमा-महे |
| २ द्वि० पु० | क्षम-से | क्षमे-थे | क्षम-ध्वे |
| ३ तृ० पु० | क्षम-ते | क्षमे-ते | क्षम-न्ते |

II आज्ञार्थः

| | | | |
|---|---|---|---|
| १ प्र० पु० | क्षमै | क्षमा-वहै | क्षमा-महै |
| २ द्वि० पु० | क्षम-स्व | क्षमे-थाम् | क्षम-ध्वम् |
| ३ तृ० पु० | क्षम-ताम् | क्षमे-ताम् | क्षम-न्ताम् |

III भूतकालः

| | | | |
|---|---|---|---|
| १ प्र० पु० | अ-क्षमे | अ-क्षमा-वहि | अ-क्षमा-महि |
| २ द्वि० पु० | अ-क्षम-थाः | अ-क्षमे-थाम् | अ-क्षम-ध्वम् |
| ३ तृ० पु० | अ-क्षम-त | अ-क्षमे-ताम् | अ-क्षम-न्त |

| Similarly: | I वर्तमानकालः | II आज्ञार्थः | III भूतकालः |
|---|---|---|---|
| | लभ-ते | लभ-ताम् | अ-लभत |
| | युध्य-ते | युध्य-ताम् | अ-युध्य-त |
| | भाष-ते | भाष-ताम् | अ-भाष-त |
| | प्रति-भाष-ते | प्रति-भाष-ताम् | प्रति-अ-भाष-त =प्रत्य-भाष-त |
| | मारय-ते | मारय-ताम् | अ-मारय-त |

IV भविष्यकालः

| | | | |
|---|---|---|---|
| १ प्र० पु० | क्षमि-ष्ये | क्षमि-ष्या-वहे | क्षमि-ष्या-महे |
| २ द्वि० पु० | क्षमि-ष्य-से | क्षमि-ष्ये-थे | क्षमि-ष्य-ध्वे |
| ३ तृ० पु० | क्षमि-ष्य-ते | क्षमि-ष्ये-ते | क्षमि-ष्य-न्ते |

| Similarly: | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| भाषि-ष्य-ते | (१) भाषि-ष्ये | भाषि-ष्या-वहे | भाषि-ष्या-महे |
| वन्दि-ष्य ते | (१) वन्दि-ष्ये | वन्दि-ष्या-वहे | वन्दि-ष्या-महे |
| प्र-स्था-स्य-ते | (१) प्रस्था-स्ये | प्रस्था-स्या-वहे | प्रस्था-स्या-महे |

N. B. If *any one* form of the future is known, *all* other forms of the future can be found.

If *any one* form of I, II or III is known, *all* the others can also be found. Let the pupil accurately remember 3rd pers. Singular of I वर्तमान० and of IV भविष्य०

| १ वर्तमानकालः | ३ भूतकालः | १ वर्तमानकालः | ३ भूतकालः |
|---|---|---|---|
| वद्-ति | अ-वद्-त् | सरति | अ-सरत् |
| गच्छ-ति | अ-गच्छ-त् | तिष्ठति | अ-तिष्ठत् |
| उप-गच्छ-ति | उप-अ-गच्छत् | रोहति | अ-रोहत् |
| | = उपा-गच्छत् | नयति | अ-नयत् |
| आ-गच्छ-ति | आ-अ-गच्छत् | यच्छति | अ-यच्छत् |
| | = आ-गच्छत् | पश्य-ति | अ-पश्यत् |
| अनु-गच्छ-ति | अनु-अ-गच्छत्<br>= अन्व-गच्छत् | भवति | अ-भवत् |
| उद्-गच्छति | उत्-अ-गच्छत् | सीदति | अ-सीदत् |
| | = उद्-गच्छत् | इयते | अ-इयत |
| निर्-गच्छति | निर्-अ-गच्छत् | भाषते | अ-भाषत |
| | निर्-गच्छत् | भजते | अ-भजत |
| Similarly | (यह ही रीति से) | नश्यति | अ-नश्यत् |
| अनु-सरति | अन्व-सरत | कुप्यति | अ-कुप्यत् |
| आ-नयति | आ-नयत् | क्रुध्यति | अ-क्रुध्यत् |
| आ-ह्वयति | आ-ह्वयत् | विद्यते | अ-विद्यत |
| आ-रोहति | आ-रोहत् | मन्यते | अ-मन्यत |
| उत्-तिष्ठति | उत्-अ-तिष्ठत् | दृश्यते | अ-दृश्यत |
| | उद्+अ-तिष्ठत् | श्रूयते | अ-श्रूयत |
| | = उद्-तिष्ठत् | क्षिपति | अ-क्षिपत् |
| प्र-यच्छति | प्र-अ-यच्छत् | स्पृशति | अ-स्पृशत् |
| | = प्रा-यच्छत् | ज्वलयति | अ-ज्वलयत् |

| | | | |
|---|---|---|---|
| प्र-सीदति | प्रा-सीदत् | पीडयति | अ-पीडयत् |
| उड्डयते | उत्-अ-डयत | मारयते | अ-मारयत |
| | =उद्-डयत | वरयते | अ-वरयत |
| प्रति-भाषते | प्रति-अ-भाषत | वि-स्मयते | व्य-स्मयत |
| | =प्रत्य-भाषत | आ-रभते | आ-रभत |
| अभि-भाषते | अभि-अ-भाषत | | |
| | = अभ्य-भाषत | | |

(४) भविष्यकालः

पठि-ष्यति—पठि-ष्यामि पठि-ष्यावः &c
भवि-ष्यति—भवि-ष्यामि भवि-ष्यावः &c
करि-ष्यति—करि-ष्यामि करि-ष्यावः &c
रक्षि-ष्यति—रक्षि-ष्यामि रक्षि-ष्यावः &c
भक्षयि-ष्यति—भक्षयि-ष्यामि भक्षयि-ष्यावः &c
गमि-ष्यति—गमि-ष्यामि गमि-ष्यावः &c
दा-स्यति—दा-स्यामि दा-स्यावः &c
ज्ञा-स्यति – ज्ञा-स्यामि ज्ञा-स्यावः &c
लप्-स्यते—लप्-स्ये लप्-स्यावहे &c
वत्-स्यति—वत्-स्यामि वत्-स्यावः &c

| स्वर | अ | इ or ई | उ or ऊ | ऋ or ॠ | ऌ |
|---|---|---|---|---|---|
| गुण | अ | ए | ओ | अर् | अल् |
| वृद्धि | आ | ऐ | औ | आर् | आल् |

कर्तव्य, करणीय, कार्य
(E) fit to be done, what ought to be done.
(H) करने योग्य, करने अवश्य
(M) करण्यास योग्य, करणें प्राप्त
(G) करवा योग्य, करवु जोईए तेवुं
(S) करण जोगो, करण जरूर
(K) माडलिक्के योग्यवादद्दु, माडतक्कद्दु

Similarly:—

| | | | | | |
|---|---|---|---|---|---|
| दातव्य, | दानीय, | देय; | श्रोतव्य, | श्रवणीय, | श्राव्य; |
| पठितव्य, | पठनीय, | पठ्य; | नेतव्य, | नयनीय, | नेय; |
| स्रष्टव्य, | सर्जनीय, | सृज्य; | गन्तव्य, | गमनीय, | गम्य; |
| प्रष्टव्य, | पृच्छनीय, | पृच्छ्य; | वन्दितव्य, | वन्दनीय, | वन्द्य |

**कर्तुम्** (E) in order to do (H) करनेके लिए
(M) करण्यासाठीं (G) करवा माटे
(S) करण लाय (K) माडलिक्के

Similarly:—

गन्तुम् ( जानेके लिए ); आगन्तुम् (आनेके लिए )
पीडयितुम् (पीडा देनेके लिए ); ज्ञातुम् (जाननेके लिए)
पठितुम् (पढ़नेके लिए); भवितुम् (होनेके लिए )
रक्षितुम् ( रक्षा करनेके लिए); दातुम् ( देनेके लिए )
लब्धुम् ( प्राप्त करनेके लिए )
बोद्धुम् ( समझनेके लिए )
बद्धुम् ( बाँधनेके लिए )
पक्तुम् (पकानेके लिए ) &c &c

**कर्तुकामः** (E) one wishing to do ( H ) करनेकी इच्छावाला
(M) करूं इच्छिणारा (G) करवा इच्छिनारो
(S) करणजी खाइश्र रखंदर (K) माडलिच्छिसुवनु

Similarly, गन्तुकामः, आगन्तुकामः, पीडयितुकामः, ज्ञातुकामः, दातुकामः, रक्षितुकामः, लब्धुकामः &c &c

**कृत्वा** (E) Having done (H) करके (M) करून
(G) करीने (S) करे (K) माडि

| | | | |
|---|---|---|---|
| ज्ञा-त्वा—( जानकर ) | | अवज्ञा-य | (अपमान करके) |
| भू-त्वा—( हो कर ) | | अनु भूय | (अनुभव करके ) |
| ग-त्वा—( जाकर ) | | आगम्य | (आकर) |
| बद्ध्वा—(बाँधकर) | | निबध्य | (जकड़ कर) |

पृष्ट्वा—( पूछ कर ); आपृच्छ्य ( रजा लेकर )
दत्वा—( दे कर ); आदाय ( ले कर )
कृत्वा—( कर के ); अपकृत्य ( अपकार करके )
स्थित्वा—( खड़ा होके ); उत्थाय ( उठ कर )
पठित्वा—( पढ़ कर )

Similarly:—भाषित्वा, उषित्वा, निधाय, सन्धाय, आरुह्य, आवृत्य, प्रतिगृह्य &c &c.

सन्धयः—Sandhis depend upon the nature of the letters coming together.

In learning Sandhis, the following division of the letters of the alphabet will be useful:—

| स्वराः Vowels | | व्यञ्जनानि Consonants | | |
|---|---|---|---|---|
| ह्रस्व Short | दीर्घ Long | कठोर Hard | मृदु Soft | |
| | | | | अनुनासिक Nasal |
